ཡོངས་སུ་བཀྲུང་དང་བཀྲུང་བའོ། འགྲོ་འཇུག་བསྟན་གནས།། 21

विस्तारो विग्रहो व्यासः स च शब्दस्य विस्तरः ।
स्यान्मर्द्दनं संवाहनं विनाशः स्याददर्शनम् ॥ २२ ॥

རྒྱ་ཆེ་ཡངས་པ་ཆེར་ཡངས་སོ། དེ་ཡང་སྒྲ་ཡི་བི་སྟ་ར།
བྲུག་པ་དང་ནི་སྐུ་བྲུག་གོ། ཉམས་པ་དང་ནི་མཐོང་བ་མེད།། 22

संस्तवः स्यात् परिचयः प्रसरस्तु विसर्पणम् ।
नीवाकस्तु प्रयामः स्यात् सन्निधिः सन्निकर्षणम् ॥ २३ ॥

ཤེས་པ་དང་ནི་ཡོངས་སུ་དྲིས། ཁྲི་པ་དང་ནི་རྣམ་པར་ཁྲེད།
ངེས་ཚིག་དང་ནི་རབ་ཏུ་ངེས། ཉེ་འཁོར་ཉེ་ལོགས་དག་དང་ནི།། 23

लवो ऽभिलावो लवने निष्पावः पवने पवः ।
प्रस्तावः स्यादवसर स्त्रसरः सूत्रवेष्टनम् ॥ २४ ॥

ཛ་བ་འབྲིག་པ་འབྲལ་བའོ། ངེས་འབྱེད་འཕྱུར་དང་འཁྲབ་པའོ།
གནས་སྐབས་དང་ནི་སྐབས་ཡིན་ནོ། ཐགས་སྤུན་དཀྲི་ཛོང་སྐལ་མ་དཀྲི།། 24

प्रजनः स्यादुपसरः प्रश्रयप्रणयौ समौ ।
धीशक्ति र्निष्क्रमोऽस्त्री तु संक्रामो दुर्गसञ्चरः ॥ २५ ॥

ཚོགས་པ་སྤོམ་པ་ཞེ་སྦྱོར་འཁྲིག་པ་འདྲ། བློ་ནུས་དང་ནི་ཆུ་སྒྲོལ་ལོ།
མོ་མིན། ཟམ་པ་བགྲོད་དཀའ་ཟམ།། 25

प्रत्युत्क्रमः प्रयोगार्थः प्रक्रमः स्यादुपक्रमः ।
स्यादभ्यादान मुद्घात आरम्भः सम्भ्रम स्त्वरा ॥ २६ ॥

འཁྲུག་ཕྱིར་འཇུག་དང་རབ་སྦྱོར་དོན། རྩོམ་པ་དང་ནི་མགོ་འཛུག།
འཇུ་བ་རྩོམ་པ་ཨཱ་རཾ་བྷ། ད་མ་ད་ས་དྲུར་དྲུར།། 26

प्रतिबन्धः प्रतिष्टम्भो ऽवनायस्तु निपातनम् ।
उपलम्भ स्त्वनुभवः समालम्भो विलेपनम् ॥ २७ ॥

བར་ཆད་དང་ནི་བགེགས་ཞེས་སོ། འོག་མིན་འོག་ཏུ་ལྟ་བའོ།
སྤོན་ཤེས་སླར་ཡང་འཕེལ་བའོ། སྐུ་བྱུག་དང་ནི་བྱུག་པའོ།། 27

विप्रलम्भो विप्रयोगो विलम्भ स्त्वतिसर्ज्जनम् ।
विश्रावस्तु प्रविख्याति रवेक्षा प्रतिजागरः ॥ २८ ॥

བརྗེས་ཆགས་དང་མི་སྨྲར་བའོ། སྒྲིན་སྤེར་རྣམ་གྲངས་རབ་ཏུ་གྲགས།
མེལ་ཚེ་བ་དང་སོ་བའོ॥ 28

निपाठनिपठौ पाठे तेमस्तेमौ समुन्दने ।
आदीनवास्रवौ क्लेशे मेलके सङ्गसङ्गमौ ॥ २९ ॥

ངེས་སློག་ངེས་བརྗོད་འདོན་པའོ། བངས་དང་གཤེར་དང་རློན་པའོ།
ཀུན་ནས་དམན་དང་ཟག་ཉེན་མོངས། འཚོགས་པ་འདུས་པ་འཕྲུངས་པའོ॥ 29

संवीक्षणं विचयनं मार्गणं मृगणा मृगः ।
परिरम्भः परिष्वङ्गः संश्लेष उपगूहनम् ॥ ३० ॥

ལྟ་བ་ཚོལ་བ་ཉུལ་འཚོལ་ལྟའོ། ཡོངས་འཁྲུད་ཡོངས་འཁྱུར་ཡང་དག་རེག།
ཉེ་བར་འཛིན་ཉེ་བར་ལྟ་རྟོག་པ་གཟིགས་པ་དང་॥ 30

निर्व्वर्णनन्तु निध्यानं दर्शनालोकनेक्षणम् ।
प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः ॥ ३१ ॥

སྣང་བར་བྱེད་དང་ལྟ་བའོ། ཕྱིར་རྒོལ་བཟློག་པ་འགོག་པ་དང་॥ 31

उपशायो विशायश्च पर्य्यायशयनार्थकौ ।
अर्त्तनञ्च ऋतीया च हृणीया च घृणार्थकाः ॥ ३२ ॥

འགེག་པ་རྣམ་གྲངས་མིང་གཞན་མིང་རིམ་དོན།
སྐྱུག་བྲོ་བཙོག་པ་སྐྱུག་བྲོ་དོན།། 32

स्याद्व्यत्यासो विपर्य्यासो व्यत्ययश्च विपर्य्यये ।
पर्य्ययोऽतिक्रम स्तस्मिन्नतिपात उपात्ययः ॥ ३३ ॥

ལྡོག་པ་ཕྱིར་ལོག་ནམ་ལྡོག་ལོག།
འགོངས་པ་འཆོངས་པ་བརྒལ་དང་འཕར།། 33

प्रेषणं यत्समाहूय तत्र स्यात् प्रतिशासनम् ।
स संस्तावः क्रतुषु या स्तुतिभूमि र्द्विजन्मनाम् ॥ ३४ ॥

པྲེ་ཥ་ཎ་ནི་གང་བོས་ནས། དེ་ལ་སླར་ཡང་བསྐོ་བའོ།
མཆོད་སྦྱིན་མཆོད་པ། བསྟོད་པའི་ས་གཞི་གཉིས་སྐྱེས་རྣམས།། 34

निधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः ।
स्तम्बघ्नस्तु स्तम्बघनः स्तम्बो येन निहन्यते ॥ ३५ ॥

ཤིང་སྟན་ཤིང་སྟེགས་གང་ལ། ཤིང་སྟན་ཤིང་ནི་ཨུ་དྷ་ན།
སྟུ་མྦ་གང་གིས་སྡིང་འཇིགས་གསུམ།། 35

आविधो विध्यते येन तत्र विष्वक्समे निघः ।
उत्कारश्च निकारश्च द्वौ धान्योत्क्षेपणार्थकौ ॥ ३६ ॥

ཀུན་བརྫོལ་མཐོ་བ་གང་གིས་རྫོལ། བིན་དྷ་ཀ་ས་མེ་ནི་གྷཿབྱུར་པོ་ཕྱུང་པོ།
སོ་བ་སྟེང་དུ་འདྲེན་པའི་དོན།། 36

निगारोद्गारविक्षावोद्ग्राहास्तु गरणादिषु ॥ ३७ ॥

སྐུགས་བརྙོག་གྲེན་བརྙོག་གསུམ་པ་སྐུགས་པ་ལ་སོགས་པ།། 37

आरत्यवरतिविरतय उपरामे वा स्त्रियान्तु निष्ठेवः ।
निष्ठूति निंष्ठेवनं निष्ठीवनमित्यभिन्नानि ॥ ३८ ॥

ཉེར་འགྲོ་བར་དེ་བི་ར་ད་ཡ། ཨུ་པ་ར་མ། མོ་མིན་ཐློ་ལུ་ལུད་པ་ལུ།
ཐློ་འཁོགས་ལུད་ལུད་པ་འབོད། འཁོགས་པ་ཞེས་པ་ཐ་དད་མིན།། 38

जवने जूतिः सातिं स्त्ववसाने स्यादथ ज्वरे जूर्त्तिः ।
उदजस्तु पशुप्रेरण मकरणिरित्यादयः शापे ॥ ३९ ॥

སྐུགས་པ་ཀྱུ་བ་སྣ་ཏི་རིག་བྱེད་དོ། དེ་ནས་རིམས་དང་ཚད་པ་དང་།
ཨུ་ད་ཛ་ནི་ཕྱུགས་བསྐུལ་པ། བྱ་མིན་ཞེས་སོགས་སྨོད་མོ་འོ།། 39

गोत्रान्तेभ्य स्तस्य वृन्द मित्यौपगवकादिकम् ।
आपूपिकं शाष्कुलिक मेवमाद्य मचेतसाम् ॥ ४० ॥

རྒྱུད་མཐར་དེ་ཡི་ཚོགས་པ། ཨཽ་པ་ག་པ་ལ་སོགས་སོ།
བེམས་པོ་སེམས་མེད་རིག་མེད་དང་། དེ་བཞིན་སེམས་མེད་ལ་སོགས་པ།། 40

माणवानान्तु माणव्यं सहायानां सहायता ।
हल्या हलानां ब्राह्मण्यवाड़व्ये तु द्विजन्मनाम् ॥ ४१ ॥

ཁྲེས་པ་དང་ནི་བུ་ཚའོ། ལྷན་ཅིག་འགྲོ་དང་དུས་གཅིག་འགྲོ།
ག་ཞོལ་ཚོགས། བྲམ་ཟེ་སྦྲ་བ་གཉིས་སྐྱེས།། 41

द्वे पर्शुकानां पृष्ठानां पार्श्वं पृष्ठ्य मनुक्रमात् ।
खलानां खलिनी खल्याप्यथ मानुष्यकं नृणाम् ॥ ४२ ॥

གཉིས་པོ་རྩིབ་ལོགས་རྣམས་ཀྱིས། རྒྱབ་རྣམས་ཀྱིས་པ་རྴྭ་པྲི་ཥྛ་གོ་རིམ་བཞིན།
གསུལ་ས་གསུལ་ཐང་གསུལ་ཁའོ། དེ་ནས་མི་ཚོམས་མི་རྣམས་ཀྱིས།། 42

ग्रामता जनता धूम्या पाश्या गल्या पृथक् पृथक् ।
अपि साहस्र-कारीष-वार्म्मणाथर्वणादिकम् ॥ ४३ ॥

གྲོང་ཚོམས་སྐྱེས་ཚོམས་དུ་བ་རྣམ། ཞགས་ཚོམས་གཏུ་སོ་སོ་འོ།
སྟོང་ཚོགས་དང་ནི་ལྕི་མི་ཚོགས། ག་ཚོགས་*རིག་བྱེད་ལ་སོགས་པ།། 43

इति संकीर्णवर्गः ।

འདྲེས་མའི་སྡེ་ཚན་ནོ།།

---

* གོ་ཆ ?

नानार्थवर्गः ।

नानार्थाः केऽपि कान्तादिवर्गेष्वेवात्र कीर्त्तिताः ।
भूरिप्रयोगा ये येषु पर्य्यायेष्वपि तेषु ते ॥ १ ॥

སྣ་ཚོགས་དོན །།

སྣ་ཚོགས་དོན་ལ་ཀ་མཐའ་སོགས། སྡེ་མཚན་གྱིས་ནི་འདིར་གྲགས་སོ།
མང་པོ་ལ་སྦྱོར་གང་གང་ལ། རྣམ་གྲངས་གང་ལ་དེ་དང་དེ།། 1

आकाशे त्रिदिवे नाको लोकस्तु भुवने जने ।
पद्ये यशसि च श्लोकः शरे खड्गे च शायकः ॥ २ ॥

ནཱ་ཀ་ནམ་མཁའ་སྐབས་གསུམ་ལ། ལོ་ཀ་ས་གཞི་སྐྱེ་བོ་ལ།
ཀང་གཅད་གྲགས་པ་ཤློ་ཀ། མདའ་དང་རལ་གྲི་ཤཱ་ཡ་ཀ།། 2

जम्बुकौ क्रोष्टुवरुणौ पृथुकौ चिपिटार्भकौ ।
आलोकौ दर्शनोद्योतौ भेरौ पटहमानकौ ॥ ३ ॥

ཅེ་སྤྱང་ཆུ་བདག་ལ་ཛམྦུ་ཀཻ་ཟ་ཏ་ཀ། ཁྲིས་པ་དག་ལ་ཕྲི་ཐུ་ཀཻ།
མཐོང་འོད་དག་ལ་ཨཱ་ལོ་ཀཽ། ཛ་ཆེན་ཛ་རིངས་མཱ་ན་ཀཽ།། 3

उत्सङ्गचिह्नयोरङ्कः कलङ्कोऽङ्कापवादयोः ।
तक्षको नागवर्द्धक्योरर्कः स्फटिकसूर्य्ययोः ॥ ४ ॥

པང་བ་རྟགས་དག་ཨཾ་ཀའོ། རྟགས་དང་ངན་སྒྲ་ཀ་ལཾ་ཀོ།
ཀླུ་ཞིང་འཇོག་པོ་ཏཀྵ་ཀ། ཞིལ་དང་ཉི་མར་ཨརྐའོ།། 4

मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोः ।
स्यात् पुलाक स्तुच्छधान्ये संक्षेपे भक्तसिक्थके ॥ ५ ॥

*རླུང་དང་ཚངས་པ་ཉི་མ་ཀ། ཕོའི་རྟགས་སོ།
ཀཾ་ནི་མགོ་དང་ཆུ་ལ་ཡིན། པུ་ལ་ཀ་ནི་སྦྲུན་སྟོང་དང་།
འབྲུ་དང་ཟན་ཆང་རྣམས་ལའོ།། 5

उलूके करिणः पुच्छमूलोपान्ते च पेचकः ।
कमण्डलौ च करकः सुगते च विनायकः ॥ ६ ॥

འུག་པ་གླང་ཆེན་མཇུག་མ་རྩེ། གླང་པོ་ཆེའི་རྩེ་མོ་རྣམས་ལ་པེ་ཙ་ཀ།
སྤྱི་བླུགས་སེར་བ་ཀ་ར་ཀ། བདེ་གཤེགས་ལོག་འདྲེན་ནཱ་ཡ་ཀ།། 6

किष्कुर्हस्ते वितस्तौ च शूककीटे च वृश्चिकः ।
प्रतिकूले प्रतीक स्त्रिष्वेकदेशे च पुंस्ययम् ॥ ७ ॥

ཀིཥྐུ་ཁྲུ་དང་མཐོ་ལའོ། ཝྲྀ་ཀ་སྲིན་བུ་ཚང་ཚང་ངོ་།
མི་མཐུན་ཕྱོགས་ནི་པྲ་ཏཱི་ཀ། གསུམ་ཡིན་ཕྱོགས་གཅིག་པོ་འདི་ཡིན།། 7

---

* Another reading : རླུང་དང་རིག་བྱེད་པ་དང་ཉི་མ་ཀ །

स्याद्भूतिकन्तु भूनिम्बे कत्तृणे भूस्तृणेऽपि च ।
ज्योत्स्निकायाञ्च घोषे च कोषातक्यथ कट्फले ॥ ८ ॥

ཧཱུ་ཏྲི་ཀཱི་ནི་ཏི་ཀ་ཏུ་དང༌། རྲ་མ་ཀ་བུར་ལི་ག་ཏུར།
ཟླ་བའི་འོད་ཟེར་དག་དང་ནི། ག་བུ་སྣྲ་གཙན་ཀོ་ཤཱ་ཏཀཱུ།
དེ་ནས་ཀ་ཊ་ཕ་ལ་སེང་ལྡེང་དཀར་པོ།། 8

सिते च खदिरे सोमवल्कः स्यादथ सिह्लके ।
तिलकल्के च पिण्याको वाह्लिकं रामठेऽपि च ॥ ९ ॥

ཟླ་བའི་ཤུན་པ་པོ་མ་ཡིན། *དེ་ནས། ཏིལ་འབའ་ཆ་དེ་པི་ཎྱཱ་ཀ།
བཱ་ཧླི་ཀ་ནི་ཤིང་ཀུན་ཀྱང༌།། 9

महेन्द्र-गुग्गुलूलूक-व्यालग्राहिषु कौशिकः ।
रुक्तापशङ्कास्वातङ्कः स्वल्पेऽपि क्षुल्लकस्त्रिषु ॥ १० ॥

མཆོད་པ་གུ་གུལ་སྦྲུལ་འཛིན་རྣམས། ཀཽ་ཤི་ཀོ།
ནད་ཚ་བརྟག་ཨ་ཏཾཀ། ཉུང་ཉུང་ཀྵུ་ལ་ཀ་གསུམ་མོ།། 10

जैवातृकः शशाङ्केऽपि खुरे ऽप्यश्वस्य वर्त्तकः ।
व्याघ्रेऽपि पुण्डरीको ना यवान्यामपि दीपकः† ॥ ११ ॥

ཡུན་རིང་འཚོ་བ་རི་བོང་མཚན། རྟ་རྨིག་ཀླུམ་མོ་བར་ཏ་ཀ།
གཟིག་དང་པདྨ་དཀར་པོ་འོ། སྨན་པ་མི་ནི་ཡང་འོད་ཅན།། 11

---

* Another reading : སོ་མ་བལ་ཀ་དེ་ནས་ནི །

† यमान्यामपि दीप्यकः इति पाठान्तरम् ।

शालावृकाः कपिक्रोष्टुश्वानः स्वर्णेऽपि गैरिकम् ।
पीडार्थेऽपि व्यलीकं स्यादलीकं त्वप्रियेऽनृते ॥ १२ ॥

ཤཱ་ལཱ་བྲི་ཀ་སྤྲེའུ་དང་། ལྕེ་སྤྱང་དང་ནི་ཁྱི་ཡིན་ནོ།
གསེར་ལ་ཡང་དོ་ས་དམར་དང་། འཛེར་བའི་དོན་ཡང་ཀྱལ་ལྷུག་ཡིན།
ཨ་ལཱི་ཀ་ནི་མི་འཛའ་བརྫུན།། 12

शीलान्वयावनूके द्वे शल्के शकलवल्कले ।
साष्टे शते सुवर्णानां हेम्न्युरोभूषणे पले ॥ १३ ॥

རང་བཞིན་རྗེ་སུ་འགྲོ་བའོ། གཉིས་པ་ཤལ་ཀེ་མཐའ་དག་ཤན་ཤུན་པ།
གསེར་སྲང་བརྒྱ་རྩ་བརྒྱད་དང་ནི། གསེར་དང་བྲང་གི་རྒྱན་དང་སྲང་།། 13

दीनारेऽपि च निष्कोऽस्त्री कल्कोऽस्त्री समलैनसोः ।
दम्भेऽप्यथ पिनाकोऽस्त्री शूलशङ्करधन्वनोः ॥ १४ ॥

ཐ་སྙད་ལ་ཡང་ཧི་ཁ་ཀོ་རོ། མོ་མིན།
ཀལྐ་མོ་མིན་དྲི་མ་དང་། སྡིག་སེམས་ཁེངས་པ་རྣམས་ཡང་ངོ།
དེ་ནས་པི་ནཱ་ཀོ། མོ་མིན་མདུང་དང་བདེ་བྱེད་གཞུ།། 14

धेनुका तु करेण्वाञ्च मेघजाले च कालिका ।
कारिका यातनावृत्त्योः कर्णिका कर्णभूषणे ॥ १५ ॥

བ་གཞོན་གླང་མོ་དྷེ་ནུ་ཀ་ཡང་ངོ། ཆར་སྤྲིན་རྒྱ་མོ་ཀཱ་ལི་ཀཱ།
རྣག་ཏུ་རབ་ཏུ་བྱེད་པ་མདོ་འགྲེལ་པ། ཀརྞི་ཀ་ནི་རྣ་རྒྱན་དང་།། 15

करिहस्ताङ्गुलौ पद्मवीजकोश्यां त्रिषूत्तरे
वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः ॥ १६ ॥

གླང་མོ་ལག་པ་སེར་གཤུབ་དང་། པདྨའི་ས་བོན་ཟེ་འབྲུའོ།
གསུམ་པོ་ཕྱི་མ་ཚོགས་གཟུགས་བཟངས། གཅིག་གཙོ་གཞན་དང་མ་འདྲེས་པ ॥ 16

स्याद्दाम्भिकः कौक्कुटिको यश्चादूरेरितेक्षणः ।
लालाटिकः प्रभो र्भालदर्शी कार्य्याक्षमश्च यः ॥ १७ ॥

གཽ་ཀྐུ་ཊི་ཀ་ཚུལ་འཆོས་དང་། གང་ཞིག་ཉེ་བར་མ་མཐོང་བ་ལ་ཐད།
ལ་ལཱ་ཊི་ཀ་གཙོ་སེམས་མཐོང་། འགའ་ཞིག་མི་ནུས་པ་ལ་ཡང་ ॥ 17

भूभृन्नितम्बवलये चक्रेषु कटको ऽस्त्रियाम् ।
सूच्यग्रे क्षुद्रशत्रौ च लोमहर्षे च कण्टकः ॥ १८ ॥

... ... ।
... ... ॥ 18

मयूख स्त्विट्करज्वालास्वलिवाणौ शिलीमुखौ ।
शङ्खो निधौ ललाटास्थ्नि कम्बौ न स्त्रीन्द्रियेऽपि खं ॥ १९ ॥

མར་མེ་སྤྲིན་འབར་མ་ཡཱུ་ཁ། བུང་བ་མདའ་དག་ཤི་ལཱི་མུ་ཁ།
ཤང་ཁ་གཏེར་དཔྲལ་རུས་དུང་ལ། མོ་མིན། ཁཾ་ནི་དབང་པོ་ལ་ཡང་ངོ་ ॥ 19

घृणिज्वाले अपि शिखे शैलवृक्षौ नगावगौ ।
आशुगौ वायुविशिखौ शरार्कविहगाः खगाः ॥ २० ॥

འོད་ཟེར་འབར་བའང་ཤི་ཁི་ནོ། རི་ཤིང་འགྲོ་མེད་ཨ་ག་ནོ།
ཨཱཿཤུ་གོ་ནི་རླུང་དང་མདའ། མདའ་ཉི་འདབ་ཁ་གནོ ‖ 20

पतङ्गौ पक्षिसूर्य्यौ च पूगः क्रमुकवृन्दयोः ।
पशवोऽपि मृगा वेगः प्रवाहजवयोरपि ॥ २१ ॥

པ་ཏཾ་གོ་ནི་བྱ་ཉི་མ། པཱུ་ཀ་གོ་ཕུ་ཚོགས་པ་དག།
ཕྱུགས་དང་རི་དྭགས་སྲི་གནོ། བེ་ག་ལེན་དང་རྒྱུག་པ་ལའང་ ‖ 21

परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि ।
गजेऽपि नागमातङ्गावपाङ्ग स्तिलकेऽपि च ॥ २२ ॥

པ་རཱ་ག་ནི་མེ་ཏོག་ཟེ། ཁྲུས་ཚལ་དང་ནི་རྡུལ་ལ་ཡང་།
གླང་ཆེན་གཏུམ་པོ་ན་གནོ། མིག་ཟུར་དཔྲལ་ཐིག་ཨ་བ་ག ‖ 22

सर्गः स्वभाव-निर्म्मोक्ष-निश्चयाध्याय-सृष्टिषु ।
योगः सन्नहनोपाय-ध्यान-सङ्गति-युक्तिषु ॥ २३ ॥

སརྒ་རང་བཞིན་ངེས་གྲོལ་དང་། ངེས་པ་ལེའུ་བྱས་རྣམས་ལ།
ཡོ་ག་གོ་གྱོན་པ་དང་ཐབས། བསམ་གཏན་སྦྱོར་བ་རིགས་རྣམས་ལ ‖ 23

भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः ।
चातके हरिणे पुंसि सारङ्गः शवले त्रिषु ॥ २४ ॥

བློ་ག་བདེ་དང་བུད་མེད་སོགས། ལོངས་སྤྱོད་སྦྲུལ་གདེངས་ལུས་དག་ལ།
ཁུག་རྟ་རི་དགས་སྐྱེས་བུ་དང་། ཁྲ་བོ་རྣམས་ལ་ཤཱ་ར་ངྒཿ།། 24

कपौ च प्लवगः शापे त्वभिषङ्गः पराभवे ।
यानाद्यङ्गे युगः पुंसि युगं युग्मे कृतादिषु ॥ २५ ॥

གསུམ་སྤྲེའུ་སྦལ་ཅན་མཆོང་འགྲོ་འོ། ཨ་བྷི་ཥཾ་ག་མནར་དང་སྨྲོས།
ཤིང་རྟའི་ལུས་སོགས་ཡུ་གའོ། ཟོ་ཡུ་གཾ་རྫོགས་ལྡན་དུས་ལ་སོགས།། 25

स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले ।
लक्ष्यदृष्ट्या स्त्रियां पुंसि गौर्लिङ्गं चिह्नशेफयोः ॥ २६ ॥

མཐོ་རིས་ཕྱུགས་དང་ངག་དང་ནི། རྡོ་རྗེ་ཕྱོགས་དང་མིག་དང་ནི།
འོད་ཟེར་ས་དང་ཕྱུགས་*རྣམས་ལ། མཚན་ཉིད་ལྷ་ཞིང་ཕོ་མོ་གཽ།
ལིངྒ་རྟགས་དང་ཤེ་པ་ཡོ།། 26

शृङ्गं प्राधान्यसान्वोश्च वराङ्गं मूर्द्धगुह्ययोः ।
भगं श्रीकाममाहात्म्यवीर्य्ययत्नार्ककीर्त्तिषु ॥ २७ ॥

ཤྲཱི་ག་གཙོ་བོ་རྩེ་མོ་འོ། མགོ་དང་གསང་གནས་བ་རཾ་གཾ།
བྷ་གཾ་དཔལ་དང་འདོད་པ་དང་། བདག་ཉིད་ཆེ་དང་བརྩོན་འགྲུས་དང་།
འདུན་པ་ཉི་མ་གྲགས་རྣམས་ལ།། 27

---

* For ཙ ?

परिघः परिघातेऽस्त्रे ऽप्योघो वृन्देऽम्भसां रये ।
मूल्ये पूजाविधावर्घ्यो ऽंहो दुःखव्यसनेष्वघम् ॥ २८ ॥

པྲ་རི་གྷཱ་ནི་ཡོངས་འཇོམས་མཚོན། ཨོ་ཚོགས་པ་དང་ཆུ་ཡི་རྒྱུན།
རིན་དང་མཆོད་བྱེད་ཨ་རྒྷོ། ཨགྷ་སྡིག་སྡུག་ཉོན་མོངས་ལ॥ 28

त्रिष्विष्टेऽपि लघुः काचाः शिक्यमृद्भेदृग्रुजः ।
विपर्य्यासे विस्तरे च प्रपञ्चः पावके शुचिः ॥ २९ ॥

གསུམ་འདོད་དང་ཉུང་ལ་ལ་གྷོ། ཀ་ཙ་དྲ་བའི་ཐག་པ་དང་།
འཕྲིང་བུ་*དང་ནི་ལིང་ཐོག་གོ། ཕྱིར་ལོག་རྒྱ་ཆེན་པྲ་པཉྩ॥ 29

मास्यमात्ये चाप्युपधे पुंसि मेध्ये सिते त्रिषु ।
अभिषङ्गे स्पृहायाञ्च गभस्तौ च रुचिः स्त्रियाम् ॥ ३० ॥

ཤུ་ཙི་མེ་དང་ཟླ་བ་དང་། ཞེན་དུ་གནོན་པ་དག་དང་ནི།
སྐྱེས་བུ་རྣམ་དག་དཀར་པོ་གསུམ། མངོན་འཁྲུད་འདོད་པ་འོད་རུ་ཙི॥ 30

प्रसन्ने भल्लुकेऽप्यच्छो गुच्छः स्तवकहारयोः ।
परिधानाञ्चले कच्छो जलप्रान्ते त्रिलिङ्गकः ॥ ३१ ॥

... ... |
... ... || 31

* For འཛིམ་པ ?

केकितार्क्ष्यावहिभुजौ दन्तविप्राण्डजाः द्विजाः ।
अजा विष्णुहरच्छागा गोष्ठाध्वनिवहा व्रजाः ॥ ३२ ॥

མོ་ལྟོས་འགྲོ་ཟ་རྨ་བྱ་ཁྱུང་། སོ་དང་བྲམ་ཟེ་སྒོང་གཉིས་སྐྱེས།
ཨཛཱ་ཁྱབ་འཇུག་དབང་ཕྱུག་རོ། འབྲོག་ལྟས་ལམ་དང་ཚོགས་བྲ་ཛཱ། 32

धर्म्मराजौ जिनयमौ कुञ्जो दन्तेऽपि न स्त्रियाम् ।
बलजे क्षेत्रपूर्द्वारे बलजा वल्गुदर्शना ॥ ३३ ॥

ཆོས་རྒྱལ་རྒྱལ་བ་གཤིན་རྗེའོ། ཀུཉྫ་སོ་དང་ཕྱུག་པའོ།
མོ་མིན། བ་ལ་ཛཾ་ནི་ཞིང་གྲོང་ཁྱེར། བ་ལ་ཛཱ་ནི་ལེགས་པར་མཐོང་། 33

समे क्ष्मांशे रणेऽप्याजिः प्रजा स्यात् सन्ततौ जने ।
अब्जौ शंखशशाङ्कौ च स्वके नित्ये निजं त्रिषु ॥ ३४ ॥

ས་མཉམ་གཡུལ་གྱི་ཨ་ཛིའོ། པྲ་ཛཱ་བུ་རྒྱུད་སྐྱེ་དགུའོ།
ཨ་བ་ཛཾ་དུང་རི་བོང་འཛིན། བདག་པོ་རྟག་པ་ནི་ཛཾ་གསུམ། 34

पुंस्यात्मनि प्रवीणे च क्षेत्रज्ञो वाच्यलिङ्गकः ।
संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चार्थसूचना ॥ ३५ ॥

སྐྱེས་བུ་བདག་དང་ལེགས་རྟོགས་པ། ཀྵེ་ཏྲ་ཛྙའོ་བརྗོད་བྱའི་རྟགས།
སཾ་ཛྙཱ་འདུ་ཤེས་མིང་དང་ནི། ལག་སོགས་དོན་གཅེར་བརྡ་ལའོ། 35

दोषज्ञौ वैद्यविद्वांसौ ज्ञो विद्वान् सोमजोऽपि च ।*
काकेभगण्डौ करटौ गजगण्डकटौ कटौ ॥ ३६ ॥

†བྱ་རོག་གླང་འགྲམ་ཀ་ར་ཊ། གླང་ཆེན་འགྲམ་དང་རྐེད་ཀ་ཊ།། 36

शिपिविष्टस्तु खलतौ दुश्चर्म्मणि महेश्वरे ।
देवशिल्पिन्यपि त्वष्टा दिष्टं दैवेऽपि न द्वयोः ॥ ३७ ॥

ཤི་པི་པིཥྚ་ཉམས་པ་དང་། ལྷགས་པ་ངན་དང་དབང་ཕྱུག་ཆེ།
ལྷ་ཡི་བཟོ་བ་ནི་ཏྭཥྚྲོ། དིཥྚཾ་ལྷས་གཉིས་འདུས་མདོ།། 37

रसे कटुः कट्ठकार्य्ये त्रिषु मत्सरतीक्ष्णयोः ।
रिष्टं क्षेमाशुभाभावेष्वरिष्टे तु शुभाशुभे ॥ ३८ ॥

རོ་བྲོ་ཀུ་ཊུ་ཀ་ཊྭ་ནི། དོན་མེད་གསུམ་མོ་སེར་སྣ་རྣོ།
རི་ཥྚཾ་བདེ་དང་མི་དགེ་དངོས། ཨ་རི་ཥྚ་ནི་དགེ་མི་དགེ། 38

मायानिश्चलयन्त्रेषु कैतवान्टतराशिषु ।
अयोघने शैलशृङ्गे सीराङ्गे कूट मस्त्रियाम् ॥ ३९ ॥

སྒྱུ་མ་མིག་གཡོར་འཁྲུལ་འཁོར་དང་། ཁེངས་པ་བདེན་ལོག་ཕུང་པོ་དང་།
ལྕགས་ཐོ་རི་དང་རྩེ་མོ་དང་། ཐོང་གཞོལ་རྣམས་ལ་ཀུ་ཊོ།། 39

---

* Some editions omit this line.

† Verse 36 adds: ཉི་མཐའ་ཅན།

सूक्ष्मैलायां त्रुटिः स्त्री स्यात् कालेऽल्पे संशयेऽपि सा ।
अत्युत्कर्षाश्रयः कोट्यो मूले लग्नकचे जटा ॥ ४० ॥

སོ་མིན་ཏྲུ་ཊི་སུག་སྨེལ་དུས་དང་ནི། ཉུང་ངུ་ཐེ་ཚོམ་རྣམས་ལའོ།
རབ་དགའི་རྟེན་པ་ཀོ་ཊིའོ། རྩ་བ་དུས་སྦྱོར་ཛ་ཊཱའོ།། 40

व्युष्टिः फले समृद्धौ च दृष्टि र्ज्ञानेऽक्ष्णि दर्शने ।
इष्टि र्यागेच्छयोः सृष्टि र्निश्चिते बहुले त्रिषु ॥ ४१ ॥

བྱུཥྚི་འབྲས་བུ་ཕུན་ཚོགས་ལ། དྲྀཥྚི་མཁྱེན་པ་མིག་དང་མཐོང་།
ཨིཥྚི་མཆོད་སྦྱིན་འདོད་པའོ། སྲྀཥྚི་ངེས་དང་མང་པོ་གསུམ།། 41

कष्टे तु कृच्छ्रगहने दक्षामन्दागदेषु च ।
पटु द्वौ वाच्यलिङ्गौ च नीलकण्ठः शिवेऽपि च ॥ ४२ ॥

ཀཥྚ་སྡུག་བསྔལ་སྐྱོབ་དཀའོ། མཁས་དང་མི་དམན་ནད་མེད་ལ།
པ་ཊུ་གཉིས་དེ་བརྗོད་བྱའི་རྟགས། ནཱི་ལ་ཀཎྛ་རྨ་བྱ་ཞིང་།། 42

पुंसि कोष्ठो ऽन्तर्जठरं कुसूलोऽन्तर्गृहन्तथा ।
निष्ठा निष्पत्तिनाशान्ताः काष्ठोत्कर्षे स्थितौ दिशि ॥ ४३ ॥

ཕོ་ཀོ་ཥྛོ་ཀྲུ་མི་གསུམ་པ་དང་། འབྲུ་རྫོང་ཁང་པའི་ནང་དེ་བཞིན།
ནི་ཥྛཱ་གྲུབ་ཟིན་ཆུད་ཟོས་མཐའ། ཀཱ་ཥྛཱ་དགའ་གནས་ཕྱོགས་ལའོ།། 43

त्रिषु ज्येष्ठोऽतिशस्तेऽपि कनिष्ठोऽतियुवाल्पयोः ।
दण्डोऽस्त्री लगुड़ेऽपि स्याद्गुड़ो गोलेक्षुपाकयोः ॥ ४४ ॥

ཛྱེ་ཥྛ་ཆེན་དང་ཕྱུལ་བྱུང་ལ། ཀནི་ཥྛ་དང་ཆུང་དང་ཉུང་།
དཎྜ་ཁྲོལ་དང་དབྱུག་པའི་གུ་ཌ་རྡོག་པོས་བུད་ཞིང་བཙོས།། 44

सर्पमांसात् पशुव्याड़ौ गोभूवाचस्त्विड़ा इला ।
क्ष्वेड़ा वंशशलाकापि नाड़ी कालेऽपि षट्क्षणे ॥ ४५ ॥

བྱཱ་ཌ་སྦྲུལ་དང་ཤ་ཟན་ཕྱུགས། ཨི་ཌས་ཕྱུགས་ངག་ཟླ་བ།
ཀྵེ་ཌ་སྨྱུག་སྐས་སྦྲ་ཡི་སྐས། · ནཱ་ཌཱི་དུས་དང་སྐད་ཅིག་དྲུག།། 45

काण्डोऽस्त्री दण्डवाणार्ववर्गावसरवारिषु ।
स्याद्भाण्ड मश्वाभरणेऽमत्रे मूलवणिग्धने ॥ ४६ ॥

ཀཱཎྜ་དབྱུག་པ་མདའ་དང་ནི། དོན་དང་སྐྱེ་ཚན་གནས་སྐབས་ཆུ།། 46

भृशप्रतिज्ञयोर्वाढं प्रगाढं भृशकृच्छ्रयोः ।
शक्तस्थूलौ त्रिषु दृढौ व्यूढौ विन्यस्तसंहतौ ॥ ४७ ॥

... ... |
... ... || 47

भ्रूणोऽर्भके स्त्रैणगर्भे बाणो बलिसुते शरे ।
कणोऽतिसूक्ष्मे धान्यांशे संघाते प्रमथे गणः ॥ ४८ ॥

བྷྲཱུ་ཎ་བུས་དང་མངལ་གཞེར་ཅན། བཱ་ཎ་སྟོབས་ལྡན་སྲུ་དང་མདའ།
ཀ་ཎ་ཤིན་ཏུ་ཕྲ་བོ་གྲོགས། ཚོགས་དང་འཇོམས་བྱེད་ག་ཎའོ།། 48

पणो द्यूतादिषूत्सृष्टे भृतौ मूल्ये धनेऽपि च ।
मौर्व्यां द्रव्याश्रिते सत्वशुक्लसन्ध्यादिके गुणः ॥ ४९ ॥

པ་ཎ་ཞི་སོགས་རྒྱལ་བུས་གླ། རིན་དང་ནོར་ལ་ཡང་དེའོ།
ཡོན་ཏན་དང་ནི་དངོས་སྐྱེས་དང་། རྡེན་དང་སྙིང་སྟོབས་དཀར་པོ་དང་།
མཚམས་ལ་སོགས་པ་གུ་ཎའོ།། 49

निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः ।
वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णन्तु वाक्षरे ॥ ५० ॥

བྱར་མེད་གནས་དང་དུས་བྱེ་བྲག། སྒྲོ་བ་དག་ལ་ཀྵ་ཎའོ།
བརྞ་གཉིས་སྐྱེས་ལ་སོགས་དང་། དཀར་པོ་ལ་སོགས་ཁ་དོག་བསྟོད།
བརྞཾ་ཡི་གེ་ལ་ཡང་ངོ་།། 50

अरुणो भास्करेऽपि स्याद्वर्णभेदेऽपि च त्रिषु ।
स्थाणुः शर्व्वेऽप्यथ द्रोणः काकेऽप्याजौ रवे रणः ॥ ५१ ॥

... ... ।
... ... ॥ 51

ग्रामणी र्नापिते पुंसि श्रेष्ठे ग्रामाधिपे त्रिषु ।
ऊर्णा मेषादिलोम्नि स्यादावर्त्ते चान्तरा भ्रुवोः ॥ ५२ ॥

གྲཱ་མ་ཎཱི་ནི་འབྲེག་མཁན་དང་། སྐྱེས་གསུམ་མཆོག་བདག་རྣམས་ལའོ།
ཨཱུརྞཱ་ལུག་སོགས་བལ་དང་ནི། སྨིན་མའི་མཚམས་ཀྱི་འཁྱིལ་བ་ལ།། 52

हरिणी स्यान्मृगी हेमप्रतिमा हरिता च या ।
त्रिषु पाण्डौ च हरिणः स्थूणा स्तम्भेऽपि वेश्मनः ॥ ५३ ॥

ཧ་རི་ཎཱི་ནི་རི་དགས་མོ། གསེར་གྱི་གཟུགས་བརྙན་སེར་པོ་ལ་འང་།
གསུམ་པོ་སྐྱ་བོ་ཧ་རི་ཎ། ལྷུགས་དང་ཁྱིམ་གྱི་ཀ་བ་ལ།། 53

तृष्णे स्पृहापिपासे द्वे जुगुप्साकरुणे घृणे ।
वणिक्पथेऽपि विपणिः सुरा प्रत्यक् च वारुणी ॥ ५४ ॥

ཏྲྀ་ཥྞེ་འདོད་པ་སྐོམ་པ་ལ། སྨོད་པ་སྙིང་རྗེ་གྷྲྀ་ཎེའོ།
ཚོང་འདུས་ལམ་ནི་བི་པ་ཎི། ཆང་དང་ནུབ་ཕྱོགས་ཝཱ་རུ་ཎི།། 54

करेणुरिभ्यां स्त्री नेभे द्रविणन्तु बलं धनम् ।
शरणं गृहरक्षित्रोः श्रीपर्णं कमलेऽपि च ॥ ५५ ॥

ཀ་རེ་ཎུ་ནི་གླང་མོ་གླང་། དྲ་བི་ཎ་ནི་ཁྲིམས་དང་སྐྱབས།
ཤྲཱི་པརྞཱི་ནི་པདྨ་བུམ* ।। 55

* ཟུམ ?

विषाभिमरलौहेषु तीक्ष्णं क्लीबे खरे त्रिषु ।
प्रमाणं हेतुमर्य्यादाशास्त्रेयत्ताप्रमातृषु ॥ ५६ ॥

དུག་གཡུལ་ལྕུགས་རྣོ་ཏཱི་ཀྵྞ། མ་ཉིད་ཁ་རེ་གསུམ།
པྲ་མཱ་ཎཾ་ནི་རྒྱུ་མཚན་དང་། ཡུལ་ལུགས་བསྟན་བཅོས་འདེབས་ཆད་ཚད།། 56

करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि ।
प्राण्युत्पादे संसरणमसम्बाधचमूगतौ ॥ ५७ ॥

ཀ་ར་ཎཾ་ནི་སྒྲུབ་ནུས་དང་། ཞིང་དང་ལུས་དབང་རྣམས་ལ་ཡང་།
སྲོག་ཆགས་སྐྱེ་བ་སཾ་སར་ཎ། དཔུང་ཚོགས་རྒྱུ་དང་གྲོང་ཁྱེར་ཐྭ།། 57

घण्टापथेऽथ वान्तान्ने समुद्गिरणमुन्नये ।
अतस्त्रिषु विषाणं स्यात् पशुशृङ्गेभदन्तयोः ॥ ५८ ॥

ས་སྒུ་དྒར་ཎ་འདོན་དང་འཁྱེར། འདི་ནས་གསུམ་སྟེ་བི་ཥཱ་ཎཾ།
ཕྱུགས་ཀྱི་རྭ་དང་ཚེམ*པ་ལ།། 58

प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे ।
सङ्कीर्णौ निचिताशुद्धावीरिणं शून्यमूषरम् ॥ ५९ ॥

པྲ་བཎ་ནི་མི་མཉམ་དང་། དགའ་དང་བཞི་མདོ་རྣམས་ལའོ།
སཾ་ཀཱིརྞ་ནི་དག་མ་དག། ཨཱི་ར་ཎཾ་སྟོང་ཚྭ་སྒོ་ཅན།། 59

* ཚེམས ?

देवसूर्यौ विवस्वन्तौ सरस्वन्तौ नदार्णवौ ।
पक्षिताक्ष्यौं गरुत्मन्तौ शकुन्तौ भासपक्षिणौ ॥ ६० ॥

ལྷ་ཉི་བི་བ་སྭན་ཏཽ་འོ། ས་ར་སྭན་ཏོ་གཙང་ཅོ་མཚོ་འོ།
བྱ་ཁྱུང་གརུཏ་མ་ནྟཽ་དང་། ཤ་ཀུ་ན་ཏི་ཁྲིམ་བྱ་བྱ།། 60

अग्न्युत्पातौ धूमकेतुजीमूतौ मेघपर्व्वतौ ।
हस्तौ तु पाणिनक्षत्रे मरुतौ पवनामरौ ॥ ६१ ॥

མེ་སྐྱེས་དུ་བ་ཀེ་ཏུའོ། ཇོ་མུ་ཏཽ་ནི་སྤྲིན་དང་རི།
ཧསྟོ་ལག་པ་མེ་བཞིའོ། མ་རུ་ཏཽ་ནི་རླུང་འཆི་མེད།། 61

यन्ता हस्तिपके सूते भर्त्ता धातरि पोष्टरि ।
यानपात्रे शिशौ पोतः प्रेतः प्राण्यन्तरे मृते ॥ ६२ ॥

ཡནྟ་གླང་ཆེན་ཁ་ལོ་སྒྱུར། བྷརྟ་འཛིན་གསོ་བ་པོ།
གྲུ་དང་བྱིས་པ་པོ་ཏའོ། པྲེ་ཏ་སྲོག་ཆགས་མཐའ་མ་རོ།། 62

ग्रहभेदे ध्वजे केतुः पार्थिवे तनये सुतः ।
स्थपतिः कारुभेदेऽपि भूभृद्भूमिधरे नृपे ॥ ६३ ॥

གཟའ་དབྱེ་རྒྱལ་མཚན་ཀེ་ཏུའོ། ས་བདག་བུ་དང་སུ་ཏའོ།
སྠ་བ་ཏི་ནི་ཤིང་མཁན་དབྱེ། ས་འཛིན་རི་དང་རྒྱལ་པོ་འོ།། 63

मूर्द्धाभिषिक्तो भूपेऽपि ऋतुः स्त्रीकुसुमेऽपि च ।
विष्णावप्यजिताव्यक्तौ सूतस्त्वष्टरि सारथौ ॥ ६४ ॥

སྤྱི་བོར་དབང་བསྐུར་རྒྱལ་རིགས་ལའང་། རི་ཏུ་བུད་མེད་མེ་ཏོག་དུས།
ཁྱབ་འཇུག་ཕམ་པ་བྱ་ཀོྡ་སྣྲ་ད།། 64

व्यक्तः प्राज्ञेऽपि दृष्टान्तावुभे शास्त्रनिदर्शने ।
क्षत्ता स्यात् सारथौ द्वाःस्थे क्षत्रियायाञ्च शूद्रजे ॥ ६५ ॥

ཁ་ལོ་སྒྱུར་བྱཀད་མཁས་དང་གསལ་བའོ། དྲྀཥྚཱ་ད་གཉིས་བསྟན་བཅོས་དང་།
ཀྵཏྟ་ཁ་ལོ་སྒྱུར་བ་དང་། སྒོ་སྐྱེས་རྒྱལ་རིགས་དམངས་འདྲེས་བུ།། 65

वृत्तान्तः स्यात् प्रकरणे प्रकारे कार्त्स्न्यवार्त्तयोः ।
आनर्त्तः समरे नृत्यस्थाननीवृद्विशेषयोः ॥ ६६ ॥

བྲྀཏྟཱནྟ་ནི་རབ་དབྱེ་དང་། བྱེ་བྲག་ཚོགས་པ་གཏམ་རྣམས་སོ།
ཨ་ནརྟ་ནི་གཡུལ་དང་ནི། གར་གནས་སྐྱེས་མཐའི་བྱེ་བྲག་ལ།། 66

कृतान्तो यमसिद्धान्तदैवाकुशलकर्म्मसु ।
श्लेष्मादि-रसरक्तादि-महाभूतानि तद्गणाः ॥ ६७ ॥

ཀྲྀ་ཏཱྟ་ད་ནི་གཤིན་དང་། གྲུབ་མཐའ་སྔོན་གྱི་མི་དགེའི་ལས།
བད་ཀན་ལ་སོགས་རོ་དང་ནི། ཁྲག་སོགས་འབྱུང་བ་ཆེན་པོ་དང་།། 67

इन्द्रियाण्यश्मविकृतिः शब्दयोनिश्च धातवः ।
कक्षान्तरेऽपि शुद्धान्तो नृपस्यासर्व्वगोचरे ॥ ६८ ॥

དེ་ཡི་ཡོན་དན་དབང་པོ་རྣམས། རྡོ་ཡི་བྱེ་བྲག་སྒྲའི་སྐྱེས་གནས།
དྷཱ་ཏུ་ཡིན་དེ་ཁམས་ཞེས་སོ། ཀ་ཀྵཱ་ནྟ་རེ་བཙུན་མོའི་འཁོར།
མི་དབང་ཀུན་གྱིས་སྤྱད་ཡུལ་ཅན།། 68

काष्ठसामर्थ्ययोः शक्ति र्मूर्त्तिः काठिन्यकाययोः ।
विस्तारवल्ल्यो र्व्रततिर्व्वसती रात्रिवेश्मनोः ॥ ६९ ॥

ཀཱ་ཥྛ་ནུས་པ་ཤཀྟིའོ། མུརྟི་སྲ་དང་ལུས་ལའོ།
ཡངས་པ་འཁྲི་ཤིང་བྲ་ཏེ་ཏི། བ་ས་ཏཱི་ནི་མཚན་མོ་ཁྱིམ།། 69

क्षयार्च्चयोरपचितिः साति र्दानावसानयोः ।
अर्त्तिः पीड़ाधनुष्कोट्यो र्जातिः सामान्यजन्मनोः ॥ ७० ॥

ཟད་མཆོད་ཨ་བ་ཙི་ཏིའོ། སཱ་ཏི་སྦྱིན་དང་གནས་དག་ལ།
ཨརྟི་ཟུག་ཏུ་གཞུ་ཡི་མཆོག། ཛཱ་ཏི་སྤྱི་དང་སྐྱེ་བ་དག།། 70

प्रचारस्यन्दयोरीती रीतिर्डिम्बप्रवासयोः ।
उदयेऽधिगमे प्राप्ति स्त्रेता त्वग्निचये युगे ॥ ७१ ॥

རབ་སྤྱོད་བསྐྱོད་པ་ཨཱི་ཏིའོ། རཱི་ཏི་མཚོང་དང་གནས་དག་གོ།
ཤར་དང་ཐོབ་པ་པྲཱཔྟིའོ། སྟེ་ཏ་སེ་གསུམ་གསུམ་ལྡན་དུས།། 71

वीणाभेदेऽपि महती भूति र्भस्मनि सम्पदि ।
नदीनगर्य्यौ नागानां भोगवत्यथ सङ्गरे ॥ ७२ ॥

པི་ལྦང་དབྱེ་བ་མ་ཧ་ཏཱི། བྷཱུ་ཏི་ཐལ་དང་ཕུན་སུམ་ཚོགས།
གཙང་པོ་ཀླུ་ཡི་གྲོང་ཁྱེར་རྣམས། བྷོ་ག་བ་ཏཱི་དེ་ནས་ནི།། 72

सङ्गे सभायां समितिः क्षयवासावपि क्षितिः ।
रवेरर्च्चिश्च शस्त्रञ्च वह्निज्वाला च हेतयः ॥ ७३ ॥

བདེ་བྱེད་གྲོགས་པོ་དག་དང་ནི། གཡུང་འདུ་ས་ནི་ས་མི་ཏི།
ཟད་དང་གནས་ལ་ཀྵི་ཏིའོ། ཉི་མའི་འོད་ཟེར་མཚོན་ཆ་དང་།
མེ་ལྕེ་འབར་བ་ཧེ་ཏོ་འོ།། 73

जगती जगति च्छन्दोविशेषेऽपि क्षितावपि ।
पंक्तिश्छन्दोऽपि दशमं स्यात् प्रभावेऽपि चायतिः ॥ ७४ ॥

ཛ་ག་ཏཱི་ནི་འགྲོ་བ་དང་། སྡེབ་སྦྱོར་བྱེ་བྲག་ས་གཞི་ལའང་།
པཾ་ཀྟི་གྲལ་དང་ཡིག་བཅུའི་སྡེབས། འོད་དང་ཆགས་པ་ཨ་ཏི།། 74

पत्तिर्गतौ च मूले तु पक्षतिः पक्षभेदयोः ।
प्रकृति र्योनिलिङ्गे च कौशिकाद्याश्च वृत्तयः ॥ ७५ ॥

པཏྟི་འགྲོ་དང་རྐང་ཐང་ངོ་། རྩ་བ་གཤེག་དབྱེ་པཀྵ་ཏི།
པཀྲྀ་ཀླེ་ད་ཡོཿསྦྲ་ཀྲི་ཏི་ནི་སྐྱེ་གནས་བཏགས། གར་ཚོགས་འཚོ་བ་བྲི་ཏིའོ།། 75

सिकताः स्यु र्वालुकापि वेदे श्रवसि च श्रुतिः ।
वनिता जनितात्यर्थानुरागायाञ्च योषिति ॥ ७६ ॥

སི་ཀ་ཏཱ་ནི་བྱེ་གྲོ་དུམ། རིག་བྱེད་ཐོས་པ་ཤྲུ་ཏིའོ།
བ་ནི་ཏཱ་དང་ཛ་ནི་ཏཱ། མ་དང་རྗེས་ཆགས་ལྡན་མེད་ལ།། 76

गुप्तिः क्षितिव्युदासेऽपि धृति र्धारणधैर्य्ययोः ।
बृहती क्षुद्रवार्त्ताकी छन्दोभेदे महत्यपि ॥ ७७ ॥

གུ་པྟི་དོང་འབྲུ་བུག་བཅས་གྲུ། དྷྲྀ་ཏི་འཛིན་དང་བློ་གྲོས་སོ།
བྲྀ་ཧ་ཏཱི་ནི་བུམ་སྨན་དང་། སྡེབ་སྦྱོར་དབྱེ་བ་ཆེན་པོ་ལའང་།། 77

वासिता स्त्रीकरिण्योश्च वार्त्ता वृत्तौ जनश्रुतौ ।
वार्त्तं फल्गुन्यरोगे च त्रिष्वप्सु च घृतामृते ॥ ७८ ॥

བུད་མེད་གླང་པོ་བཱ་སི་ཏཱ། བརྟ་འཚོ་བ་སྐྱེ་བོ་འི་གཏམ།
བཱརྟ་ནད་མེད་སྙིང་པོ་མེད། གསུམ་ཞུན་མར་མར་ནི་ཨ་མྲི་ཏེ།། 78

कलधौतं रौप्यहेम्नो र्निमित्तं हेतुलक्ष्मणोः ।
अत्याहितं महाभीतिः कर्म्म जीवानपेक्षि च ॥ ७९ ॥

ཀ་ལ་དྷཽ་ཏཾ་དངུལ་དང་གསེར། ནི་མི་ཏྟཾ་ནི་རྒྱུ་མཚན་ཉིད།
ཨ་ཏྱཱ་ཧི་ཏཾ་འཇིགས་ཆེན་དང་། ལས་ཀྱིས་འཚོ་བ་མི་ལྟ་བྱེད།། 79

युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु ।
श्रुतं शास्त्रावधृतयो र्युगपर्य्याप्तयोः कृतम् ॥ ८० ॥

རིག་པས་ས་སོགས་དུས་བྷཱུ་ཏཾ། སྲོག་ཆགས་འདས་དུས་འདྲ་བ་གསུམ།
ཤྲུ་ཏཾ་བསྟན་བཅོས་པ་འཛིན་ཆེན་དང་། རྫོགས་ལྡན་རྣམས་གྲངས་ཐོབ་ཀྲི་ཏཾ།། 80

वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले ।
महद्राज्यञ्चावगीतं जन्ये स्याद्गर्हिते त्रिषु ॥ ८१ ॥

བྲི་ཏྟཾ་ཚིགས་བཅད་སྤྱོད་པ་གསུམ། འདས་དུས་བསྟན་པོ་ཧྲུམ་པོ་ལ།
མ་ཧ་ད་ནི་རྒྱལ་སྲིད་དང་། སྐྱེས་བོས་སྨོད་དང་ཆེན་པོ་ལ།
ལས་ཀྱིས་འཚོ་བ་མི་ལྷ་བྱེད*།། 81

श्वेतं रौप्येऽपि रजतं हारे रौप्ये सिते त्रिषु ।
त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादिरागि च ॥ ८२ ॥

གསུམ་ཞེད་དངུལ་དང་དཀར་པོ་ལ། ར་ཛ་ཏཾ་ནི་དོ་ཤལ་དང་།
དངུལ་དང་དཀར་པོ་རྣམས་ལ་གསུམ། གསུམ་པོ་དེ་ནས་ཛ་གད་ནི།
འགྲོ་བ་དང་ནི་འཁོར་བ་ལ། རཀྟཾ་སྔོ་སོགས་ཆགས་པ་ལ།། 82

अवदातः सिते पीते शुद्धे बद्धार्जुनौ सितौ ।
युक्तेऽतिसंस्कृते मर्षिण्यभिनीतोऽथ संस्कृतम् ॥ ८३ ॥

ཨ་བ་ད་ཏ་དཀར་པོ་དང་། སེར་པོ་དང་ནི་དག་པའོ།
ལྷག་ལུས་དཀར་པོ་སི་ཏོ། རིགས་དང་མངོན་པར་ལེགས་སྦྱར་དང་།
ཉུས་པ་ཡ་བྷི་ནཱི་ཏའོ། དེ་ནས་ལེགས་སྦྱར་ཟིན་པ་དང་།། 83

---

* Superfluous.

क्वचिमे लक्षणोपेतेऽप्यनन्तोऽनवधावपि ।
ख्याते हृष्टे प्रतीतोऽभिजातस्तु कुलजे बुधे ॥ ८४ ॥

མཚན་ཉིད་ལྡུ་པེ་ཏེ་ཡང་ངོ། ཨ་ནནྟ་ནི་མཐའ་ཡས་དགར།
གྲགས་དང་ཡིད་འོང་པྲ་ཏཱི་ཏོ། ཨ་བྷི་ཛཱ་ཏ་རིགས་སྐྱེས་བློ། ‖ 84

विविक्तौ पूतविजनौ मूर्च्छितौ मूढसोच्छ्रयौ ।
द्वौ चाम्लपरुषौ शुक्तौ शितौ धवलमेचकौ ॥ ८५ ॥

བི་བི་ཀྟཽ་ནི་དག་དང་དབེན། མཱུར་ཚྪཽ་ཏཽ་ནི་རྨོངས་དང་མཐོ།
གཉིས་དག་སྐྱུར་རྩུབ་ཤུཀྟཽ། ཤི་ཏཱི་དཀར་དང་དཀར་ནག་འདྲེས། ‖ 85

सत्ये साधौ विद्यमाने प्रशस्ते ऽभ्यर्हिते च सन् ।
पुरस्कृतः पूजितेऽरात्यभियुक्तेऽग्रतः कृते ॥ ८६ ॥

སདུ་ལེགས་དང་རིགས་ལྡན་དང་། དགེ་བ་ཕན་བྱེད་བདེན་པའོ།
པུ་ར་སྐྲྀད་མཆོད་པ་དང་། དགྲ་དང་མངོན་པར་རིག་པ་དང་།
མངོན་དུ་བྱ་བ་རྣམས་ལའོ། ‖ 86

निवातावाश्रयावातौ शस्त्राभेद्यञ्च वर्म्म यत् ।
जातोन्नद्धप्रवृद्धाः स्युरुच्छ्रिता उत्थितास्त्वमी ॥ ८७ ॥

ནི་ཝཱ་ཏ་ནི་རླུང་མེད་གནས། མཚོན་གྱིས་མི་ཆོད་གོ་ཆ་ལའང་།
ཛཱ་ཏཿསྐྱེས་དང་འཚོ་བ་ཐོབ། ཨུཙྪྲི་ཏ་དང་ཨུཏྠི་ཏ་འདི་རྣམས། ‖ 87

वृद्धिमत्प्रोद्यतोत्पन्ना आदृतौ सादरार्चितौ ।
अर्थोऽभिधेयो रैवस्तु प्रयोजननिवृत्तिषु ॥ ८८ ॥

མཐོ་དང་ཤར་ཕྱོགས་སྐྱེ་བ་རྣམས། ཨཱ་དྲི་ད་ནི་དག་མཆོད་བྱེད།
ཨརྠ་བརྗོད་བྱ་རིན་པོ་ཆེ། དངོས་པོ་དགོས་པ་ཆོ་རྣམས་ལ།། 88

निदानागमयोस्तीर्थ मृषिजुष्टजले गुरौ ।
समर्थस्त्रिषु शक्तिष्ठे सम्बन्धार्थे हितेऽपि च ॥ ८९ ॥

ཏཱིརྠ་གླིང་གཞི་ལུང་དང་ནི། དྲང་སྲོང་སྲུ་སྤྱོགས་ལྷི་བའོ།
ས་མརྠ་གསུམ་ནུས་པ་དང་། འདོད་པ་འབྲེལ་འདོད་ཕན་པ་ལའང་།། 89

दशमीस्थौ क्षीणरागवृद्धौ वीथी पदव्यपि ।
आस्थानीयत्नयोरास्था प्रस्थो ऽस्त्री सानुमानयोः ॥ ९० ॥

ད་ཤ་མཱི་སྠཽ་ཆགས་ཉམས་རྒན། ཝཱི་ཐཱི་ལི་དང་རྒྱུག་པའོ།
ཨཱསྠཱ་དམའ་བ་གནས་མཐོང་བ། པྲསྠ་མོ་མིན་སཱ་ནུ་དང་། བྲི་ལའོ།། 90

अभिप्रायवशौ छन्दावब्दौ जीमूतवत्सरौ ।
अपवादौ तु निन्दाज्ञे दायादौ सुतबान्धवौ ॥ ९१ ॥

དགོངས་ཅན་དབང་བྱེད་ཚནྡ་དའོ། ཨ་བ་དཽ་སྤྲིན་དང་ལོ་ལའོ།
ཨ་པ་བཱ་དཽ་སྨོད་དང་སྨོངས། དཱ་ཡ་དཽ་ནི་བུ་དང་གཉེན།། 91

पादा रश्म्यंघ्रितूर्य्यांशा श्चन्द्राग्न्यर्का स्तमोनुदः ।
निर्व्वादो जनवादेऽपि शादो जम्बालशष्पयोः ॥ ९२ ॥

པཱ་དཱ་འོད་ཟེར་ཞབས་དང་ནི། བཞི་ཆ་ཟླ་མེ་ཉི་མུན་སེལ།
ནི་རྦཱ་ད་ན་སྐྱེ་བོས་སྨྲས། ཤཱ་དོ་ལྷམ་དང་སྒྲ་གུའོ། 92

आरावे रुदिते चातर्य्याक्रन्दो दारुणे रणे ।
स्यात् प्रसादो ऽनुरागेऽपि सूदः स्याद्यञ्जनेऽपि च ॥ ९३ ॥

དཀྲུང་བ་ངུ་སྐད་སྐྱོབ་པ་རྣམས། ཨཱ་ཀྲནྡོ་དྲག་པོའི་གཡུལ།
པྲ་སཱ་ད་ནི་དངས་པའོ། སུ་དང་ཟས་སྦྱོར་བྲགས་པ་ཡང་། 93

गोष्ठाध्यक्षेऽपि गोविन्दो हर्षेऽप्यामोदवन्दः ।
प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदो ऽस्त्रियाम् ॥ ९४ ॥

ཙུ་དབོན་བ་རྫི་གོ་བིནྡ། ཨ་མོ་དེ་ནི་དགའ་དང་ཆང་།
གཙོ་བོ་དང་ནི་རྒྱལ་པོ་འོ། རྟགས།
ཁྱུ་མཆོག་ནོག་རྣམས་ཀ་ཀུ་དོ། མོ་མིན་ནོ། 94

स्त्री सम्विज्ज्ञानसम्भाषाक्रियाकाराजिनामसु ।
धर्म्मे रहस्युपनिषत् स्यादृतौ वत्सरे शरत् ॥ ९५ ॥

མོ་སཾ་ཝིད་ནི་མཁྱེན་པ་དང་། གསུང་ངག་བྱ་བྱེད་གསུལ་མིང་རྣམས།
ཆོས་དབེན་ཨུ་པ་ནི་ཥ་ད། སྟོན་ཀ་ལོ་ནི་ཤ་རད། 95

पदं व्यवसित-त्राण-स्थान-लक्ष्मांघ्रि-वस्तुषु ।
गोष्पदं सेविते माने प्रतिष्ठा कृत्यमास्पदम् ॥ ९६ ॥

པ་དཾ་བྱ་བ་སྒྲུབ་པ་དང་། གནས་དང་ཕྱུན་ཚོགས་རྐང་པ་དངོས།
གོ་ཥྤ་དཾ་ནི་ཞབས་ཏོག་བྲེ། རབ་གནས་ཐོབ་པ་ཨཱ་སྤ་དཾ།། 96

त्रिष्विष्टमधुरौ स्वादू मृदू चातीक्ष्णकोमलौ ।
मूढाल्पापटुनिर्भाग्या मन्दाः स्यु द्वौ तु शारदौ ॥ ९७ ॥

གསུམ། ཡིད་འོང་སྙང་ཙྪི་སྭཱ་དུའོ།
མྲི་དུ་ནོ་དང་འཇམ་པ་དག། རྨོངས་དང་ཉུང་དང་མི་གསལ་དང་།
སྐལ་པ་ངན་རྣམས་མནྡའོ། གཉིས་ཤཱ་རྡི་ནི་རྩེ་མོ་གཉེན་པའོ།། 97

प्रत्यग्राप्रतिभौ विद्वत्सुप्रगल्भौ विशारदौ ।
व्यामो वटश्च न्यग्रोधावुत्सेधः काय उन्नतिः ॥ ९८ ॥

བི་ཤཱ་ར་དོ་ཡོངས་ཅན་མཁས། ནམ་མཁའི་དམའ་མོ་ནྱ་གྲོ་དྷ།
ཨུད་སེདྷ་ལུས་དང་མཐོ།། 98

पर्य्याहारश्च मार्गश्च विवधौ वीवधौ च तौ ।
परिधि र्यज्ञियतरोः शाखायामुपसूर्य्यके ॥ ९९ ॥

ལེན་བྱེད་ལ་ནི་བཱི་བ་དྷ། བི་བ་དྷ་ཡང་དེ་བཞིན་ནོ།
པ་རི་དྷི་ནི་མཆོད་སྦྱིན་གྱི། ཏོད་ཕྱུར་ཤཱ་ཁཱ་ཉེ་འཁོར་རོ།། 99

बन्धकं व्यसनं चेतः पीड़ाधिष्ठानमाधयः ।
स्युः समर्थननीवाकनियमाश्च समाधयः ॥ १०० ॥

ད་མ་ཉེས་པ་སེམས་ནད་དང་། བྲིན་གྱིས་བརླབས་པ་ཨ་དྷི་འོ།
མཉམ་དོན་སི་བོན་ངག་དང་ནི། ངེས་པ་རྣམས་ནི་ས་མ་དྷི།། 100

दोषोत्पादेऽनुबन्धः स्यात् प्रकृत्यादिविनश्वरे ।
मुख्यानुयायिनि शिशौ प्रकृतस्यानुवर्त्तने ॥ १०१ ॥

ཉེས་སྐྱེ་ཨ་ནུ་བནྡྷ་དང་། རང་བཞིན་ལ་སོགས་དབྱངས་མེད་དང་།
གཙོ་བོ་རྗེས་སུ་འགྲོ་བ་དང་། བྱིས་པ་རང་བཞིན་རྗེས་འགྲོ་འོ།། 101

विधु र्विष्णौ चन्द्रमसि परिच्छेदे विलेऽवधिः ।
विधि र्विधाने दैवे च प्रणिधिः प्रार्थने चरे ॥ १०२ ॥

བིདྷུ་ཁྱབ་འཇུག་ཟླ་བའོ། ཡོངས་གཅོད་དུས་དག་ཨ་ཝ་དྷི།
བི་དྷི་སྒྲུབ་དང་སྔོན་གྱི་ལས། པྲ་ཎི་དྷི་ནི་སྨོན་མོ་སྤྱོད།། 102

बुधवृद्धौ पण्डितेऽपि स्कन्धः समुदयेऽपि च ।
देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम् ॥ १०३ ॥

བུདྷ་རྒན་དང་མཁས་པའོ། སྐནྡྷ་ཡང་དག་འཚོགས་པའོ།
ཡུལ་གཙང་པོ་ཁྱད་ཨབ་དྷི། སིནྡྷུ་ཆ་ཕྲན་ལའོ་མོ།། 103

विधाविधौ प्रकारे च साधू रम्येऽपि च त्रिषु ।
वधू जाया स्नुषा स्त्री च सुधालेपोऽमृतं स्नुही ॥ १०४ ॥

བི་དྷཱ་བི་དྷཽ་རྣམ་པའོ། སཱ་དྷཱུ་དགའ་བ་དང་ལེགས་པ་ལ།
བ་དྷཱུ་བུད་མེད་མནའ་མ་ཆུང་། སུ་དྷཱ་བྱུག་པ་བདུད་རྩི་སྡོན* ། 104

सन्धा प्रतिज्ञा मर्य्यादा श्रद्धा सम्प्रत्ययः स्पृहा ।
मधु मद्ये पुष्परसे क्षौद्रे चान्धतमस्यपि ॥ १०५ ॥

སནྡྷཱ་ནི་ཆ་ཡུལ་ཆོས་སོ། ཤྲདྡྷཱ་བློ་དང་འདོད་པའོ།
མ་དྷུ་ཆང་དང་མེ་ཏོག་རྩི་དང་སྦྲང་། ཨནྡྷ་ལོང་བ་མུན་པའོ། 105

अतस्त्रिषु समुन्नद्धौ पण्डितंमन्यगर्व्वितौ ।
ब्रह्मबन्धुरधिक्षेपे निर्द्देशे ऽथावलम्बितः ॥ १०६ ॥

འདི་ནས་གསུམ་ཡིན་ས་མུནྣདྡྷོ། མཁས་པའི་ང་རྒྱལ་ཁེངས་པའོ།
ཚངས་གཉེན་ཞིན་དུ་གཡོ་དང་ངེས་བསྟན་པ། 106

अविदूरोऽप्यवष्टब्धः प्रसिद्धौ ख्यातभूषितौ ।
सूर्य्यवह्नी चित्रभानू भानू रश्मिदिवाकरौ ॥ १०७ ॥

ཉེན་དང་རིང་མིན་མཐོང་ཨ་བཏྲ་བོ། པྲ་སི་དྡྷི་ནི་གྲགས་དང་རྒྱན།
ཉི་མེ་ཙི་ཏྲ་བྷཱ་ནུའོ། བྷཱ་ནུ་འོད་ཟེར་འོད་ཀྱི་བྱེད། 17

---

* ཉ་སྡོན ?

भूतात्मानौ धातृदेहौ मूर्खनीचौ पृथग्जनौ ।
ग्रावाणौ शैलपाषाणौ पत्रिणौ शरपक्षिणौ ॥ १०८ ॥

བྷཱུ་ཏཱ་ཏྨཱ་ནཽ། འབྱུང་པོའི་བདག་ཉིད་མ་ལུས། རྨོངས་དང་དམན་པ་སོ་སོ་སྐྱེ།
གྲཱ་བ་ཎཻ་ནི་རི་དང་རྡོ། པ་ཏྲི་ཎི་ནི་སྒྲོ་ལྡན་མདའ་དང་བྱ་དག་གོ།། 108

तरुशैलौ शिखरिणौ शिखिनौ वह्निबर्हिणौ ।
प्रतियत्नावुभौ लिप्सोपग्रहावथ सादिनौ ॥ १०९ ॥

ཤིང་དང་རིན་ཆེ་མོ་ཅན། ཤི་ཁི་ནཻ་མེ་རྨ་བྱ།
བྲ་ཏི་ཡ་དན་གཉིས་མཐུན་སེམས། ཉེར་འཛིན་དེ་ནས་སཱ་དི་ནོ།། 109

द्वौ सारथिहयारोहौ वाजिनोऽश्वेषुपक्षिणः ।
कुलेऽप्यभिजनो जन्मभूम्यामप्यथ हायनाः ॥ ११० ॥

གཉིས། ཁ་ལོ་སྒྱུར་དང་རྟ་བཞོན། བཱ་ཛི་ན་ནི་མདའ་*དང་བྱ།
ཀུ་ལེ་པྱ་བྷི་ཛ་ན་ནི། སྐྱེ་བ་དང་ནི་སྐྱེས་པའི་ས། དེ་ནས་ཧཱ་ཡ་ན་ཞེས་པ།། 110

वर्षार्चिर्व्रीहिभेदाः स्यु श्चन्द्राग्न्यर्का विरोचनाः ।
केशेऽपि वृजिनो विश्वकर्म्मार्कसुरशिल्पिनोः ॥ १११ ॥

ལོ་དང་འོད་ཟེར་འབྲུ་ཡི་དབྱེ། ཟླ་མེ་ཉི་མ་བི་རོ་ཙ་ནཱ།
སྐྲ་འཕྲུལ་བྲི་འཛིན་ཡིན་ནོ། སྣ་ཚོགས་ལས་དང་ཉི་མ་དང་།
ལྷ་དང་བཟོ་དག་ཡིན་ནོ།། 111

* For ཏ ?

आत्मा यत्नो धृति र्बुद्धिः स्वभावो ब्रह्मवर्ष्म च ।
शत्रुधातुकमत्तेभवर्षुकाब्दा घनाघनाः ॥ ११२ ॥

ཨཱད་མཱན་འདྣུན་པ་འཛིན་པ་དང་། བློ་གྲོས་རང་བཞིན་ཚངས་པ་གླང་སྲོས་དང་།
ཆར་སྤྲིན་གྷཱ་ན་གྷཱན་ནོ།། 112

अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः ।
घनो मेघे मूर्त्तिगुणे त्रिषु मूर्त्ते निरन्तरे ॥ ११३ ॥

ཨ་བྷི་མ་ན་དོན་སོགས་ཀྱི། ང་རྒྱལ་ཤེས་པ་ཡིད་བརྩུགས་རྣམ་འཚེའོ།
གྷ་ན་སྤྲིན་དང་གཟུགས་ཡོན་ཏན། གསུམ་མཁྲེགས་པ་དང་ནི་བར་མེད་དོ།། 113

इनः सूर्य्ये प्रभौ राजा मृगाङ्के क्षत्रिये नृपे ।
वाणिन्यौ नर्त्तकीमत्ते स्रवन्त्या मपि वाहिनी ॥ ११४ ॥

ཨཱི་ན་ཉི་མ་འོད་ཟེར། ར་ཛ་ན་ནི་རི་དགས་མཚན།
རྒྱལ་རིགས་མི་ཡི་དབང་པོ་ལ། ནྲ་ཏི་ཀཱི་ནི་གར་མ་སྒྲོས།
མཚན་ཡོད་དམག་ནི་བཱ་ཧི་ནཱི།། 114

ह्रादिन्यौ वज्रतड़ितौ वन्दायामपि कामिनी ।
त्वग्देहयोरपि तनुः सूनाधोजिह्विकापि च ॥ ११५ ॥

ཧྲ་དི་ནཱི་ནི་གནམ་ལྕགས་གློག། བནྡྷ་ཡ་ན་ཆགས་ཅན་མ།
ལྤགས་དང་ལུས་དག་ཏ་ནུའོ། ཤཱུ་ནཱ་འོག་ཏུ་ལྕེ་འཆད་པ།། 115

क्रतुविस्तारयोरस्त्री वितानं त्रिषु तुच्छके ।
मन्देऽथ केतनं कृत्ये केतावुपनिमन्त्रणे ॥ ११६ ॥

མེ་ཏོག་བི་ཏཱ་ནཾ་མཆོད་སྦྱིན་དང་། རྒྱ་ཆེན་མོ་མིན་གསུམ་སྟོང་དམན།
དེ་ནས་ཀེ་ཏ་ནམ་བྱུས་ཟེན། རྒྱལ་མཚན་མཉན་ཅིག། 116

वेद स्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः ।
उत्साहने च हिंसायां सूचने चापि गन्धनम् ॥ ११७ ॥

བེད་དེ་ཉིད་དཀ་ནི། ཚངས་པ་བྲམ་ཟེ་སྐྱེ་དགུའི་བདག།
སྤྲོ་དང་རྣམ་འཚེ་ཕྲ་མ་རྣམས། གནྡྷ་ནཱ་མ།། 117

आतञ्चनं प्रतीवापजवनाप्यायनार्थकम् ।
व्यञ्जनं लाञ्छनं श्मश्रु निष्ठानावयवेष्वपि ॥ ११८ ॥

ཨཱཏཉྩ་ནཾ་བསྐྱུན་ཚུ་དང་། བང་དང་རང་ཉིད་དོན་ལའོ།
བྱཉྫ་ནཾ་ནི་རྟགས་དང་ནི། སྨ་ར་ཚང་མ་ཆ་ཤས་རྣམས།། 118

स्यात् कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ।
स्यादुद्यानं निःसरणे वनभेदे प्रयोजने ॥ ११९ ॥

ཀཽ་ལཱི་ནཾ་ནི་སྐྱེ་བོས་སྨོད། དུད་འགྲོ་འཐབ་དང་སྤྲུལ་བྱ་ལའང་།
ཨུདྱཱ་ན་ནི་གྲོང་ཕྱི་རིམ། ནགས་དབྱེ་དང་ནི་རབ་དགོས་ལ།། 119

अवकाशे स्थितौ स्थानं क्रीड़ादावपि देवनम् ।
उत्थानं पौरुषे तन्त्रे सन्निविष्टोद्गमेऽपि च ॥ १२० ॥

དབེན་གནས་གནས་དག་སྠཱ་ནཾ། གཙོ་བའི་འཚོགས་པ་དེ་བ་ནཾ།
ཨུ་ཏྠཱ་ནཾ་ནི་སྐྱེས་མཐུ་ཅན། དམག་དང་སྤྱུད་ནས་ལངས་པ་ལ།། 120

व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च ।
मारणे मृतसंस्कारे गतौ द्रव्येऽर्थदापने ॥ १२१ ॥

བྱུ་ཏྠཱ་ནི་དིང་འཛིན་ཟད། འགལ་བར་སྤྱོད་པ་རྣམས་ལའོ།
འཆི་དང་རོ་བསྲེག་འགྲོ་བ་དང་། རྫས་དང་སྦྱིན་པ་སླར་འོང་དང་།། 121

निवर्त्तनोपकरणानुव्रज्यासु च साधनम् ।
निर्यातनं वैरशुद्धौ दाने न्यासार्पणेऽपि च ॥ १२२ ॥

པན་བྱེད་རྗེས་འགྲོ་སཱ་དྷ་ནཾ། ནིརྻཱ་ཏ་ནཾ་དུས་དག་པ།
སྦྱིན་དང་བཅོལ་བ་གཏད་པའོ།། 122

व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ।
पक्ष्माक्षिलोम्नि किञ्जल्के तन्त्वाद्यंशेऽप्यणीयसि ॥ १२३ ॥

བྱ་ས་ནཾ་ནི་ཕུན་ཚོགས་མིན། ཉམས་པ་ཉེས་པ་འདོད་སྐྱེ་ཁྲོ་སྐྱེའོ།
པཀྵྨ་ནི་མིག་རྫི་ཀེ་ས་ར་དང་། ཏཾ་ཏྭ་དྲྀ་ཤེ་བྱ་ཆུང་བ།། 123

तिथिभेदे क्षणे पर्व्व वर्त्म नेत्रच्छदेऽध्वनि ।
अकार्य्यगुह्ये कौपीने मैथुनं सङ्गतौ रतौ ॥ १२४ ॥

ཚེས་དབྱེ་སྐད་ཅིག་པར་བ་ན། བརྟྨ་མིག་ལྤགས་ལམ།
དོན་མེད་གསང་བ་ཀཽ་པཱི་ནེ། མི་ཐུ་ནཾ་ནི་འདུས་དང་དགའ།། 124

प्रधानं परमात्मा धीः प्रज्ञानं बुद्धिचिह्नयोः ।
प्रसूनं पुष्पफलयो र्निधनं कुलनाशयोः ॥ १२५ ॥

པྲ་དྷཱ་ནཾ་ནི་མཆོག་བདག་བློ། པྲཛྙཱ་ནཾ་ནི་བློ་གྲོས་རྟགས།
པྲསཱུ་ནཾ་ནི་མེ་ཏོག་འབྲས། ནི་དྷ་ནཾ་ནི་རིགས་དང་ཉམས།། 125

क्रन्दने रोदनाह्वाने वर्ष्म देहप्रमाणयोः ।
गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे ॥ १२६ ॥

ཀྲནྡ་ན་ནི་ངུ་དང་འབོད། བརྵྨ་ནི་ལུས་དང་ཚད།
ཁྱིམ་དང་འོད་ཟེར་ལུས་མཐུ་དང་། དྷཱ་མཱ་ནི་དེ་ནས་ནི།། 126

सन्निवेशे च संस्थानं लक्ष्म चिह्नप्रधानयोः ।
आच्छादने सम्पिधान मपवारणमित्युभे ॥ १२७ ॥

བཞིན་དོ་གྲོང་སྐྲ་སཾ་སྠཱ་ནཾ། ཕུན་ཚོགས་རྟགས་ནི་པྲ་དྷཱ་ན།
ཨཱཙྪཱ་ད་ནི་འགེབས་སྒྲིབ་གཉིས།། 127

आराधनं साधने स्यादवाप्तौ तोषणेऽपि च ।
अधिष्ठानं चक्रपुरप्रभावाध्यासनेष्वपि ॥ १२८ ॥

ཨཱ་རཱ་དྷ་ནི་སྒྲུབ་པ་དང་། ཐོབ་དང་ཚིམ་པ་རྣམས་ལ་ཡང་།
ཨཱདྷིཥྛཱ་ནི་གྲོང་འཁོར་དང་། མཐུ་དང་གནས། 128

रत्नं स्वजातिश्रेष्ठेऽपि वने सलिलकानने ।
तलिनं विरले स्तोके वाच्यलिङ्गा स्तथोत्तरे ॥ १२९ ॥

རཏྣཾ་རང་རིགས་རིན་ཆེན་མཆོག། བ་ན་ཆུ་དང་ནགས་ཁྲོད་དོ།
ཏ་ལི་ནཾ་ནི་མཐོར་དང་ཉུང་། བརྗོད་བྱའི་རྟགས་ཅན་དེ་བཞིན་ཕྱི། 129

समानाः सत्समैकेये स्युः पिशुनौ खलसूचकौ ।
हीनन्यूना वूनगर्ह्यौ वेगिशूरौ तरस्विनौ ॥ १३० ॥

ས་མཱ་ན་ནི་མཚུངས་དང་གཅིག། པི་ཤུ་ནཽ་ནི་ཐ་ཤལ་དབྱེན།
ཧཱི་ནཱིཾ་མ་གང་དམན་ཐ་ཤལ། བང་དང་དཔའ་བ་ཏ་ར་སྭཱི་ནཽ། 130

अभिपन्नोऽपराद्धोऽभिग्रस्तव्यापन्नतावपि ।
कलापो भूषणे वर्हे तूणीरे संहतेऽपि च ॥ १३१ ॥

ཨ་བྷི་པ་ནྣོ་ཉེས་བྱས་དང་། དགྲ་དབང་སོང་དང་དོན་མེད་བྱས།
ཀ་ལཱ་པ་ནི་རྒྱན་དང་ནི། རྨ་བྱའི་མདོངས་དང་ཚོགས་པ་ལ་འང་། 131

परिच्छदे परीवापः पर्य्युप्तौ सलिलस्थितौ ।
गोधुग्गोष्ठपती गोपौ हरविष्णू वृषाकपी ॥ १३२ ॥

པ་རཱི་བཱ་ས་ཡོངས་གཅོད་དང་། པརྱུ་པྟཽ་དང་ཆུ་གནས་པ།
འཇོ་བ་ལ་བདག་གོ་པོ། དབང་ཁྱབ་འཇུག་བྲི་ཥཱ་ཀ་པཱི།། 132

वाष्प मुष्माश्रु कशिपु त्वन्न माच्छादनं द्वयम् ।
तल्पं शय्याट्टदारेषु स्तम्बेऽपि विटपो ऽस्त्रियाम् ॥ १३३ ॥

བཱཥྤ་སྣངས་པ་མིག་ཆུའོ། ཀ་ཤི་པུ་ནི་ས་གོས་གཉིས།
ཏ་ལྤཾ་ཉལ་པ་ཁང་སྟེང་ཆུང་མ། བི་ཊ་པོ་ནི་ཚང་ཚིང་དང་།། 133

प्राप्तरूपस्वरूपाभिरूपा बुधमनोज्ञयोः ।
भेद्यलिङ्गा अमी कूर्म्मी वीणाभेदश्च कच्छपी ॥ १३४ ॥

མོ་མིན་པྲ་པྟ་རཱུ་པ་སྭ་རུ་པ། ཨི་རཱུ་པ་ནི་མཁས་པ་དང་ནི་ཡིད་འོང་བ།
དབྱེ་བ་རྟགས་འདི་རྣམས་ལ་ནི། རུས་སྦལ་མོ་དང་དབྱངས་ཅན་མའི།
པི་ཝང་ཀཙྪ་པི་ཡིན་ནོ།། 134

रवर्णे पुंसि रेफः स्यात् कुत्सिते वाच्यलिङ्गकः ।
अन्तराभवसत्वेऽश्वे गन्धर्व्वौ दिव्यगायने ॥ १३५ ॥

བར་དོ་བར་སྲིད་སེམས་ཅན་དང་། རྟ་དང་ལྷ་ཡི་གླུ་གནྡྷ།། 135

कम्बु र्ना वलये शङ्खे द्विजिह्वौ सर्पसूचकौ ।
पूर्व्वोऽन्यलिङ्गः प्रागाह पुम्बहुत्वेऽपि पूर्व्वजान् ॥ १३६ ॥

ཀམྦུ་རྒྱན་མངས་དུང་ལའོ། ལྕེ་གཉིས་སྦྲུལ་དང་སྤྲུ་མའོ།
པུརྦ་གཞན་གྱི་རྟགས་ཅན་ནོ། དང་པོ་མང་ཚིག་སྔོན་ལས་སྐྱེས།། 136

कुम्भौ घटेभमूर्द्धांशौ डिम्भौ तु शिशुबालिशौ ।
स्तम्भौ स्थूणाजडीभावौ शम्भू ब्रह्मत्रिलोचनौ ॥ १३७ ॥

ཀུན་བྷཱི་བུམ་པ་གླང་ཆེན་མགོ། ཌི་བྷཱི་བྱིས་པ།
སྟམ་བྷཱི་ཀ་བ་རེངས་བྱེད་ལ། ཤཾ་བྷུ་ཚངས་དང་སྤྱན་གསུམ་པ།། 137

कुक्षिभ्रूणार्भका गर्भाः विश्रम्भः प्रणयेऽपि च ।
स्याद्भेर्य्यां दुन्दुभिः पुंसि स्यादक्षे दुन्दुभिः स्त्रियाम् ॥ १३८ ॥

རགྦྷ*མངལ་དང་སེམས་ཅན་བྱིས། བི་ཤྲཾ་བ་ནི་ཡིད་ཆེས་མཐུན།
ཛ་ནི་དུནྡུ་བྷིཿསྐྱེས་སོ། ཅོ་ལོ་དུནྡུ་བྷི་སྟེ་མོ།། 138

स्यान्महारजने क्लीवं कुसुम्भं करके पुमान् ।
क्षत्रियेऽपि च नाभि र्ना सुरभि र्गवि च स्त्रियाम् ॥ १३९ ॥

ཚོན་ཆེན་མ་ཉིང་ཀུ་སུ་མྦྷ། སྤྱི་བླུགས་ལ་ནི་སྐྱེ་བུའོ།
རྒྱལ་རིགས་ལྟེ་བ་ན་བྷི་སྐྱེས། སུ་ར་བྷི་ནི་བ་ལང་མོ།། 139

---

* For ཀུ་ཀྵི ?

सभा संसदि सभ्ये च त्रिष्वध्यक्षेऽपि वल्लभः ।
किरणप्रग्रहौ रश्मी कपिभेकौ प्लवङ्गमौ ॥ १४० ॥

ས་བྷཱ་ཚོགས་དང་ཡིད་ཆེས་ཚས་སོ། གསུམ་བདག་ཡིད་ཆེས་བལླ་བྷ།
ལྷུ་ཝི་ཝོ། འོད་ཟེར་བྲ་བ་ཉི་རཤྨི་འོ། སྤྲེའུ་སྤྲུལ་པ་མཆོང་འགྲོ་འོ॥ 140

इच्छामनोभवौ कामौ शक्त्युद्योगौ पराक्रमौ ।
धर्म्माः पुण्ययमन्यायस्वभावाचारसोमपाः ॥ १४१ ॥

འདོད་དང་ཡིད་སྐྱེས་ཀཱ་མོ་འོ། པ་རཱ་ཀྲ་མོ་དཔལ་ཕལ་གནོན།
དྷརྨ་བསོད་ནམས་གཤིན་རྗེ་རིགས། རང་བཞིན་སྤྱོད་དང་ཟླ་བའི་བཏུང་ ॥ 141

उपायपूर्व्व आरम्भ उपधा चाप्युपक्रमः ।
वणिक्पथः पुरंवेदो निगमो नागरो वणिक् ॥ १४२ ॥

ཐབས་དང་སྔོན་མ་རྩོམ་པ་དང་། གོ་རིམ་ཞུ་པ་ཀྲ་མོའོ།
ཚོང་ལམ་གྲོང་ཁྱེར་རིས་བྱེད་དང་ ॥ 142

नैगमौ द्वौ बले रामो नीलचारुसिते त्रिषु ।
शब्दादिपूर्व्वो वृन्देऽपि ग्रामः क्रान्तौ च विक्रमः ॥ १४३ ॥

ནི་ག་མའོ། ཞི་དང་བཟོད་པ་ཀླུ་མའོ།
ར་མོ་སྤོབས་ལྡན་དང་ནི་སྔོ། མཛེས་དང་དཀར་པོ་གསུམ་ཡིན་ནོ།
སྒྲ་སོགས་སྔོན་སྦྱོར་ཚོགས་གྲ་མ། རྣམ་པར་གནོན་པ་བི་ཀྲ་མ ॥ 143

गुल्मा रुक्स्तम्बसेनाश्च जामिः स्वसृकुलस्त्रियोः ।
क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु ॥ १४४ ॥

གུལ་མཱ་སྨན་དང་ཡིད་ཆེས་དམན། ཡཱ་མི་བུ་མོ་རིགས་ལྡན་མོ།
ཞིང་དང་བཟོད་མ་ཀྵཱ་མའོ། ཀྵཱ་མི་རིགས་དང་ནུས་ལྡན་པན། གསུམ།། 144

त्रिषु श्यामौ हरित्कृष्णौ श्यामा स्याच्छारिवा निशा ।
ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु ॥ १४५ ॥

གསུམ་ཡིན་ཤྱཱ་མོ་འཁྲོག་བྱེད་ནག། ཤྱཱ་མཱ་ཧླུང་*དང་མཚན་མའོ།
ལ་ལཱ་མཾ་ན་མཇུག་མ་དང་། མདངས་དང་རྟ་རྒྱན་གཙོ་བོ་རྟོག།། 145

सूक्ष्मं मध्यात्म मखादौ प्रधाने प्रथमस्त्रिषु ।
वामौ वल्गुप्रतीपौ द्वावधमौ न्यूनकुत्सितौ ॥ १४६ ॥

སུཀྵྨཱ་མ་ལྷག་པའི་བདག་ཀུང་ངོ། དང་པོ་གཙོ་བོ་པྲ་ཐ་མ།
གསུམ་བཱ་མོ་སྐྲོགས་སོ་ཡིད་ལ། གཉིས་ཨ་དྷ་མོ་མ་གང་ངན།། 146

जीर्णश्च परिभुक्तश्च यातयाममिदं द्वयम् ।
तुरङ्गगरुडौ तार्क्ष्यौ निलयापचयौ क्षयौ ॥ १४७ ॥

རྒས་པ་དང་ནི་ཡོངས་སུ་སྤྱོང་†། ཡཱ་ཏ་ཡ་མ་འདི་གཉིས་སོ།
མྱུར་འགྲོ་འདབ་བཟང་ཏཱར་ཀྵྱོ་འོ། གནས་དང་ཉམས་པ་ཀྵཱ་ཡའོ།། 147

---

* ཤཱ་རི་བཱ is a plant. † སྤྱོང་ ?

श्वश्र्वौ देवरश्यालौ भ्रातृव्यौ भ्रातृजद्विषौ ।
पर्जन्यौ रसदब्देन्द्रौ स्यादर्य्यः स्वामिवैश्ययोः ॥ १४८ ॥

ཤྭ་ཤྲུ་རྻཽ་ནི་སྐུད་པོ་གཅིད་མོ། བྷྲཱ་ཏྲྀ་ཝྱཽ་ནི་སྤུན་སྐྱེས་སྦྲ*།
པ་རྫ་ནྱཽ་ནི་འབྲུག་སྤྲིན་དབང་། ཨ་རྱ་འཕགས་བདག་རྗེ་རིགས་སོ། ‖ 148

तिष्यः पुष्ये कलियुगे पर्य्यायो ऽवसरे क्रमे ।
प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु ॥ १४९ ॥

ཏི་ཥྱ་རྒྱལ་དང་རྩོད་ལྡན་དུས། པརྻཱ་ཡོ་ནི་གནས་སྐབས་རིམ།
པྲ་ཏྱ་ཡ་ནི་གཞན་དབང་དང་། མནའ་དང་ཤེས་པ་ཡིད་ཆེས་དང་། ‖ 149

रन्ध्रे शब्देऽथानुशयो दीर्घद्वेषानुतापयोः ।
स्थूलोच्चय स्त्वसाकल्ये गजानां मध्यमे गते ॥ १५० ॥

རྒྱུ་དང་བུ་ག་སྒྲ་ལའོ། ཡུན་རིང་ཞེ་སྡང་རྗེས་སུ་གདུང་།
སྠུ་ལོ་ཙྪ་ཡ་མ་ཚང་དང་། གླང་ཆེན་འབྲིང་དུ་བསྐྱོད་པའོ། ‖ 150

समयाः शपथाचारकालसिद्धान्तसंविदः ।
व्यसनान्यशुभं दैवं विपदित्यनया स्त्रयः ॥ १५१ ॥

ཤ་མ་ཡ་ནི་མནའ་དང་ནི། སྤྱོད་དུས་གྲུབ་མཐའ་ཡང་དག་རིག།
ཉེས་རྒྱུ་མི་དགེ་སྐྱོན་ལས་དང་། ‖ 151

---

* For དགྲ ?

अत्ययो ऽतिक्रमे कृच्छ्रे दोषे दण्डेऽप्यथापदि ।
युद्धायत्योः सम्परायः पूज्यस्तु श्वशुरेऽपि च ॥ १५२ ॥

པཱུ་ཛྱ་གྱོས་པོ་ལ་ཡང་ངོ༎ 152

पश्चादवस्थायिबलं समवायश्च सन्नयौ ।
संघाते सन्निवेशे च संस्त्यायः प्रणया स्त्वमी ॥ १५३ ॥

སནྣ་ཡོ་ནི་དཔུང་རྣམས་ཀྱི། ཕྱིར་གནོད་*རྒྱབ་ན་གནས་རྣམས་སོ།
ཚོགས་དང་འདུག་ཙོམ་སཾསྟྱཱ་ཡ། པྲ་ཎ་ཡཱ་ནི་རྣམས་ཏེ༎ 153

विस्रम्भ-याच्ञा-प्रेमाणो विरोधेऽपि समुच्छ्रयः ।
विषयो यस्य यो ज्ञात स्तच्च शब्दादिकेष्वपि ॥ १५४ ॥

ཡིད་ཆེས་སློང་མ་ཡིད་བཙུགས་རྣམས། ས་མུ་ཙྪ་འགལ་མེད་ཀྱང་།
བི་ཥ་ཡོ་ནི་ཤེས་བྱ་ཡི། གང་གི་དེ་ལ་སྒྲ་སོགས་རྣམས༎ 154

निर्यासेऽपि कषायो ऽस्त्री सभायाञ्च प्रतिश्रयः ।
प्रायो भूम्न्यन्तगमने मन्यु र्दैन्ये क्रतौ क्रुधि ॥ १५५ ॥

དུར་ཁ་†བཀུ་བ་ཀ་ཥ་ཡོ། མོ་མིན་འདུ་ཁང་པྲ་ཏི་ཤྲ་ཡའོ།
པྲཱ་ཡོ་ཐལ་ཆེར་མཐར་འབྱིན་དང་། དམན་པ་མཆོད་སྦྱིན་ཁྲོ་བ་ལ༎ 155

* For རྡོད ? † For ཏར་ཀ ?

रहस्योपस्थयो र्गुह्यं सत्यं शपथतथ्ययोः ।
वीर्य्यं बले प्रभावे च द्रव्यं भव्ये गुणाश्रये ॥ १५६ ॥

གསང་དང་དབེན་གནས་གུ་ཧྱཾ་ངོ། ས་ཏྱཾ་ངག་ཚངས་བདེན་པའོ།
བཱིཪྻཾ་དཔའ་སྟོབས་ནུས་པའོ། དྲ་བྱཾ་སྐལ་པ་ཡོན་དན་གནས། ‖ 156

धिष्ण्यं स्थाने गृहे भेऽग्नौ भाग्यं कर्म्म शुभाशुभम् ।
कशेरुहेम्नो र्गाङ्गेयं विशल्या दन्तिकापि च ॥ १५७ ॥

དྷི་ཥྞྱཾ་གནས་དང་ཁང་པ་དང་། བྷཱ་གྱཾ་ལས་དང་དགེ་མི་དགེ།
ཧ་དང་གསེར་ནི་གཱཾ་གེ་ཡཱི། བི་ཥ་ལྱཱ་ནི་སོ་ལྷན་ནོ། ‖ 157

वृषाकपायी श्रीगौर्य्योरभिख्या नामशोभयोः ।
आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ॥ १५८ ॥

བྲྀ་ཥཱ་ཀ་པཱ་ཡི་ནི་དཔལ་གཽ་རི། ཨ་བྷི་ཁྱཱ་ནི་མིང་དང་མཛེས།
རྩོམ་དང་ངེས་བྱེད་སློབ་པ་དང་། མཆོད་དང་སྒྲུབ་བྱ་ཐབས་ལས་སེམས། ‖ 158

उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रियाः ।
छाया सूर्य्यप्रिया कान्तिः प्रतिविम्ब मनातपः ॥ १५९ ॥

གསོ་དཔྱད་དགུ་ལ་ཀྲི་ཡའོ། ཚཱ་ཡཱ་ཉི་ཆུང་མཛེས་པ་དང་།
གཟུགས་བརྙན་ཚ་བ་མེད་རྣམས་ལ། ‖ 159

कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने ।
कृत्या क्रियादेवतयो स्त्रिषु भेद्ये धनादिभिः ॥ १६० ॥

ཀ་ཀྵྱ་རི་མིག་ཁྱིམ་ལ་སོགས། ཀེད་རྒྱན་གླང་ཆེན་དབུས་སུ་འཆིང་།
ཀྲི་ཏྱ་བྱ་བ་ལྷ་དག་གསུམ། དབྱེ་བ་བསྒྲུབ་བྱ་ལ་སོགས་ཀྱིས།། 160

जन्यं स्याज्जनवादेऽपि जघन्योऽन्त्ये ऽधमेऽपि च ।
गर्ह्याधीनौ च वक्तव्यौ कल्यौ सज्जनिरामयौ ॥ १६१ ॥

ཛ་ནྱ་སྐྱེ་བོས་དམོད་པའོ། ཛ་གྷ་ནྱོ་ནི་མཐའ་སྨྲུབ་བྱེད།
ངན་པ་གཞན་དབང་བཀྟ་བྱོ། གལྱཽ་ནད་མེད་ཡོན་ཏན་ཅན།། 161

आत्मवाननपेतोऽर्थादर्थ्यः पुण्यन्तु चार्व्वपि ।
रूप्यं प्रशस्तरूपेऽपि वदान्यो वल्गुवागपि ॥ १६२ ॥

བདག་ལྡན་ནོར་བྲལ་ཨར་ཐྱོ། པུ་ཎྱཾ་ཡིད་དུ་འོང་བའོ།
རཱུ་པྱ་དཔག་དང་གཟུགས་བཟང་ངོ་། བ་དཱ་ནྱོ་ནི་ངག་མཛེས་པ།། 162

न्याय्येऽपि मध्यं सौम्यन्तु सुन्दरे सोमदैवते ।
निवहावसरौ वारौ संस्तरौ प्रस्तराध्वरौ ॥ १६३ ॥

རིག་པ་དང་ནི་མ་དྷྱོ། སཽ་མྱཾ་གདུ་བུ་ཟླ་བ་ལྷ།
ཚོགས་དང་རེ་མོས་སྟྲ་རོ་འོ། ས་སྟྲ་རོ་ནི་མཆོད་སྦྱིན་ལ།། 163

गुरू गीष्पतिपित्राद्यौ द्वापरौ युगसंशयौ ।
प्रकारौ भेदसादृश्यावाकाराविङ्गिताकृतौ ॥ १६४ ॥

གུ་རུ་སྤྱིར་བུ་པ་ལ་སོགས། དྭཱ་པ་རོ་ནི་དུས་ཐེ་ཚོམ།
པྲ་ཀཱ་རོ་ནི་དབྱེ་དང་དཔེ། ཨཱ་ཀཱ་རཱ་ནི་ལུས་ཚུལ་བྱེད།། 164

किंशारू धान्यशूकेषु मरू धन्वधराधरौ ।
अद्रयो द्रुमशैलार्काः स्त्रीस्तनाब्दौ पयोधरौ ॥ १६५ ॥

ཀི་ཤཱ་རཱུ་ནི་སོ་རྩེར་འདོད། མ་རུ་སྐྱ་ངམ་ཐང་དང་རི།
ཨ་དྲི་ཤིང་དང་རི་ཉི་མ། མོ། ནུ་མ་ཆུ་ནི་པ་ཡོ་དྷ་རོ།། 165

ध्वान्तारिदानवा वृत्रा बलिहस्तांशवः कराः ।
प्रदरा भङ्गनारीरुग्बाणा अस्राः कचा अपि ॥ १६६ ॥

དྷྭཱ་ནྟཱ་རི་ནི་ལྷ་མིན་འཁོར། སྤུད་དང་ལག་པ་འོད་ཀཱ་རཱ།
པྲ་ད་ར་ནི་འཛོམས་བྱེད་དང་། བུད་མེད་རྐེད་ནད་དང་ནི་མདའ།
ཨ་སྲ་སྐྲ་དང་ཟུར་ཡིན་ནོ།། 166

अजातशृङ्गा गौः कालेऽप्यश्मश्रु र्ना च तूवरः ।
स्वर्णेऽपि राः परिकरः पर्य्यङ्कपरिवारयोः ॥ १६७ ॥

ར་མེད་བ་ལང་དུས་དང་ནི། སྨྲ་ར་མེད་པ་དུ་བ་རོ།
རིན་ཆེན་གསེར་ནི་རཱ་ཞེས་སོ། པ་རི་ཀ་ར་དཀྱིལ་དཀྲུངས་འཁོར།། 167

मुक्ताशुद्धौ च तारः स्याच्छारो वायौ स तु त्रिषु ।
कर्व्वुरेऽथ प्रतिज्ञाजिसम्बिदापत्सु सङ्गरः ॥ १६८ ॥

མུ་ཏིག་དག་པ་ཏཱ་རཱ་ཡིན། ཁྲ་བོ་ཀླུང་གསུམ་ཀ་བྲུ་རེ།
དེ་ནས་དམ་འཆའ་གཡུལ་དང་ནི། རིག་པ་གཏོད་པ་སཾ་ག་ར།། 168

वेदभेदे गुप्तिवादे मन्त्रो मित्रो रवावपि ।
मखेषु यूपखण्डेऽपि स्वरु गुंह्येऽप्यवस्करः ॥ १६९ ॥

རིག་བྱེད་དབྱེ་བ་དག་དང་ནི། གབ་ཚིག་གསང་སྔགས་མནྟོ།
མི་ཏྲ་ཉི་མ་ལ་ཡང་ངོ་། སྒྲོག་ཤིང་དུམ་བུ་སྭ་རུའོ།
གྲ་ཤལ་དང་ནི་བ་སྐཱ་ར།། 169

आड़म्बर स्तूर्य्यरवे गजेन्द्राणाञ्च गर्जिते ।
अभिहारो ऽभियोगे च चौर्य्ये सन्नहनेऽपि च ॥ १७० ॥

ཨ་ཊཾ་བ་ར་ཛ་དང་ནི། ཉི་མ་གླང་ཆེན་དབང་སྒྲོགས་སོ།
ཨ་བྷི་ཧཱ་ར་མངོན་སྦྱོར་དང་། ཀུ་དང་གོ་ཆ་གྱོན་པ་ལ།། 170

स्याज्जङ्गमे परीवारः खड्गकोशे परिच्छदे ।
विष्टरो विटपी दर्भमुष्टिः पीठाद्य मासनम् ॥ १७१ ॥

པ་རཱི་བཱ་ར་དག་པ་ཡང་དང་། རལ་གྲི་ཤུབས་དང་གོས་ལའོ།
བིཥྚ་རཱོ་ནི་ཚང་ཚོང་དང་། ཀུ་ཤ་ཚངས་པ་ཁྲི་སོགས་སྟན།། 171

दारि द्वाःस्थे प्रतीहारः प्रतीहार्य्यप्यनन्तरे ।
विपुले नकुले विष्णौ बभ्रुः स्यात् पिङ्गले त्रिषु ॥ १७२ ॥

སྒོ་སྲུང་སྒོར་གནས་པྲ་ཏཱི་ཧཱ་ར། པྲ་ཏཱི་ཧཱརྱ་མཐའ་ཡས་སོ།
ཆེན་པོ་ནེའུ་ལེ་ཁྱབ་འཇུག་དང་། ཨ་བྷྲུ*ཡིན་དེ་སྐྱ་བོ་གསུམ།། 172

सारो बले स्थिरांशे च न्याय्ये क्लीवं वरे त्रिषु ।
दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम् ॥ १७३ ॥

སཱ་ར་དཔུང་གནས་ཆ་ཤས་དང་། བཀོད་པ་མ་ནིང་མཆོག་གསུམ་མོ།
དུ་རོ་ད་རོ་ཤོ་བྱེད་དང་། ཤོ་རྒྱལ་དུ་རོ་ད་རང་ངོ་།། 173

महारण्ये दुर्गपथे कान्तारः पुन्नपुंसकम् ।
मत्सरोऽन्यशुभद्वेषे तद्वत् कृपणयोस्त्रिषु ॥ १७४ ॥

གཡུལ་ཆེན་འགྲོད་དཀའ་ལམ་དང་ནི། སྐྱེས་བུ་མ་ནིང་ཀཱནྟཱ་ར།
མད་ས་རོ་གཞན་དགེ་ལ། ཞེ་སྡང་དེ་བཞིན་སེར་སྣ་གསུམ།། 174

देवाहृते वरः श्रेष्ठे त्रिषु क्लीवे मनाक्प्रिये ।
वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना ॥ १७५ ॥

བ་ར་ལྷ་ཡིས་སྤྲེལ་བ་དང་། མཆོག་གསུམ་མ་ནིང་ཅུང་ཟད་དགའ།
བཾ་ཤཱཾ་ཀུ་རེ་སྨྱུག་མའི་སྨྱུག། མོ་མིན་ཤིང་དབྱེ་བུམ་པའོ།། 175

---

* For བ་བྷྲུ ?

ना चमूजघने हस्तसूत्रे प्रतिसरोऽस्त्रियाम् ।
यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु ॥ १७६ ॥

དམག་དཔུང་དང་ནི་དམག་གི་གཞིས། ལག་སྐུད་པྲ་ཏི་ས་རའོ།
གཤིན་རྗེ་རླུང་དང་དབང་པོ་དང་། ཉི་ཟླ་ཁྱབ་འཇུག་སེང་གེ་འོད།། 176

शुकाहिकपिभेकेषु हरि र्ना कपिले त्रिषु ।
शर्करा कर्परांशेऽपि यात्रा स्याद् यापने गतौ ॥ १७७ ॥

གཡུལ་དང་ནེ་ཚོ་སྦྲུལ་དང་ནི། སྤྲེའུ་སྦལ་བ་ཧ་རི་སྟེ།
པོ་སྐྱ་བོ་ལས་ནི་ཧ་གོས་གསུམ་མོ། ཤཀ་ར་ནི་གྱོ་དུམ་མོ།
ཡཱ་ཏྲཱ་ལྷོད་མོ་འགྲོ་བའོ།། 177

इरा भूवाक्सुराप्सु स्यात्तन्द्री निद्राप्रमीलयोः ।
धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि ॥ १७८ ॥

ཨི་རཱ་ས་དང་ངག་ཆང་ཆུ། ཏནྡྲཱི་གཉིད་དང་རྨུགས་པའོ།
དྷཱ་ཏྲཱི་མ་མ་ཞིང་དང་མ།། 178

क्षुद्रा व्यङ्गा नटी वेश्या सरघा कण्टकारिका ।
त्रिषु क्रूरेऽधमे ऽल्पेऽपि क्षुद्रो मात्रा परिच्छदे ॥ १७९ ॥

ཀྵུ་དྲཱ་ཡོན་པོ་གར་མཁན་མ། སྨད་འཚོང་སྦྲང་རྩི་ཀཱི་རི་ཀཱ་གསུམ།
ཐ་ངན་སྨོད་ཅུང་ཀྵུ་དྲོ། མཱ་ཏྲཱ་ཡོ་བྱད་ཅུང་དང་ཚད།། 179

अल्पे च परिमाणे सा मात्रं कार्त्स्न्येऽवधारणे ।
आलेख्याश्चर्य्ययो श्चित्रं कलत्रं श्रोणिभार्य्ययोः ॥ १८० ॥

མཱ་ཏྲཾ་ཀུན་དང་འཛིན་པ་དང་། ཙི་ཏྲཾ་ཀུན་བྲིས་ངོ་མཚར་ཅན།
ཀ་ལ་ཏྲཾ་ནི་ཆུ་བོ་ཆུང་[མ]།། 180

योग्यभाजनयोः पात्रं पत्रं वाहनपक्षयोः ।
निदेशग्रन्थयोः शास्त्रं शस्त्र मायुधलौहयोः ॥ १८१ ॥

རིགས་ལྡན་སྣང་དག་པཱ་ཏྲཾ་ངོ་། པ་ཏྲཾ་བཞོན་པ་འདབ་མའོ།
ངེས་བསྟན་གཞུང་ནི་ཤཱ་སྟྲཾ་ངོ་། ཤ་སྟྲཾ་མཚོན་དང་ལྕགས་དག་ལ།། 181

स्याज्जटांशुकयो र्नेत्रं क्षेत्रं पत्नीशरीरयोः ।
मुखाग्रे क्रोड़हलयोः पोत्रं गोत्रन्तु नाम्नि च ॥ १८२ ॥

ཛ་ཕྲན་གོས་མིག་ནེ་ཏྲཾ་ངོ་། ཀྵེ་ཏྲཾ་ཆུང་མ་ལུས་དག་གོ།
གོ་ཏྲཾ་རིགས་དང་མིང་ལའོ།། 182

सत्र माच्छादने यज्ञे सदादाने वनेऽपि च ।
अजिरं विषये कायेऽप्यम्बरं व्योम्नि वाससि ॥ १८३ ॥

ས་ཏྲཾ་གོས་དང་མཆོད་སྦྱིན་དང་། རྟག་ཏུ་སྦྱིན་དང་ནགས་པའོ།
ཨ་ཛི་ར་ནི་ཡུལ་དང་ལུས། ཨཾ་བ་རཾ་ནི་ནམ་མཁའ་གོས།། 183

चक्रं राष्ट्रेऽप्यक्षरन्तु मोक्षेऽपि क्षीर मस्तु च ।
स्वर्णेऽपि भूरिचन्द्रौ द्वौ द्वारमात्रेऽपि गोपुरम् ॥ १८४ ॥

ཙ་ཀྲཾ་ཕ་རོལ་དམག་དང་གཡུལ། ཨཀྵ་ར་ནི་གྲོལ་བའོ།
ཀྵཱི་རཾ་ཆུ་དང་འོ་མའོ། གསེར་ཀྱང་བྷཱུ་རི་ཙན་དྲ་གཉིས།
སྒོ་སྒྲུགས་ཀྱང་ནི་བ་ཡང་ཁྱིམ། གོང་པུ་རེ་རཾ॥ 184

गुहादम्भौ गह्वरे द्वे रहोऽन्तिक मुपह्वरे ।
पुरोऽधिक मुपर्य्यग्राण्यगारे नगरे पुरम् ॥ १८५ ॥

ཕུག་དང་ང་རྒྱལ་ག་ཧྭ་རེ། དབེན་མཐའ་ཨུ་བ་ཧྭ་རེ་འོ།
སྔོན་ལག་སྟེང་ནི་ཨ་གཱ་རོ། ཁྱིམ་དང་གྲོང་ཁྱེར་པུ་རང་ངོ॥ 185

मन्दिरञ्चाथ राष्ट्रोऽस्त्री विषये स्यादुपद्रवे ।
दरोऽस्त्रियां भये श्वभ्र वज्रोऽस्त्री हीरके पवौ ॥ १८६ ॥

འདུ་ས་དེ་ནས་ར་ཥྚྲོ་ནི། མོ་མིན་ཡུལ་དང་བར་དུ་གཅོད།
དར་མོ་མིན་འཇིགས་དང་དོང་། བཛྲ་མོ་མིན་ཕ་ལམ་ཐོག॥ 186

तन्त्रं प्रधाने सिद्धान्ते सूत्रवापे परिच्छदे ।
औशीर श्चामरे दण्डेऽप्यौशीरं शयनासने ॥ १८७ ॥

ཏནྟྲཾ་གཙོ་བོ་གྲུབ་མཐའ་དང་། ཐགས་འཐག་འདྲིས།
ཨཽ་ཤཱི་རཾ་ནི་རྔ་ཡབ་ཡུམ། ཨཽ་ཤཱི་རཾ་ནི་ཉལ་བ་སྟན॥ 187

पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले ।
व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः ॥ १८८ ॥

པུཥྐ་རཾ་ནི་གླང་ཆེན་སྣ། ཛ་དང་སྣོད་ཁ་ཚུ་དང་ནི॥ 188

अन्तर मवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये ।
छिद्रात्मीयविनावहिरवसरमध्येऽन्तरात्मनि च ॥ १८९ ॥

མཚམས་དང་ཞམ་ཐབས་ཐིབས་པོ་དང་། དབྱེ་བ་དེ་དོན་བུ་ག་དང་།
བར་གྱི་མ་རྟོགས་ཕྱི་གནས་སྐབས། དབུས་མ་བར་གྱི་བདག་ཉིད་དང་॥ 189

मुस्तेऽपि पिठरं राजकशेरुण्यपि नागरम् ।
शार्व्वरं त्वन्धतमसे धातुके भेद्यलिङ्गकम् ॥ १९० ॥

ལི་ག་བུར་ནི་པི་ཋ་རཾ། མོན་ལུག་སྣ་ནི་ནཱ་ག་རཾ།
ཤཱར་རཾ་ནི་མུན་སྟུག་དང་། འཛེམས་བྱེད་དབྱེ་བ་རྟགས་མེད་དོ॥ 190

गौरोऽरुणे सिते पीते व्रणकार्य्यप्यरुष्करः ।
जठरः कठिनेऽपि स्यादधस्तादपि चाधरः ॥ १९१ ॥

གོ་ར་དམར་དང་དཀར་དང་སེར། རྨ་བྱེད་ཨུ་ཤ་ར་ཡིན་ནོ།
ཛ་ཋ་ར་ནི་སྲན་དུང་གསུམ། ཨ་དྷ་ཥྚ་ནི་མཚུ་ཡིན་ནོ॥ 191

अनाकुलेऽपि चैकाग्रो व्यग्रो व्यासक्त आकुले ।
उपर्य्युदीच्यश्रेष्ठेष्वप्युत्तरः स्यादनुत्तरः ॥ १९२ ॥

འདྲིས་མེད་གཅིག་ནི་ཨ་གྲའོ། བྱ་གྲོ་ཀུན་ཆགས་བག་མའོ།
སྟེང་བྱེད་མཆོག་རྣམས་ཨུཏྟ་ར། ཨ་ནུཏྟ་ར་དེ་རྣམས་ཀྱི། ‖ 192

एषां विपर्य्यये श्रेष्ठे दूरानात्मोत्तमाः पराः ।
स्वादुप्रियौ तु मधुरौ क्रूरौ कठिननिर्द्दयौ ॥ १९३ ॥

རྣམ་པར་ལོག་དེ་གཙོ་བོ་ཡི། རང་དང་པ་རོལ་མཆོག་པ་རཱ།
ཞིམ་དང་དགའ་བ་མ་དྷུ་རོ། ཀྲུ་རཽ་སྲ་དང་སྙོད་པའོ། ‖ 193

उदारो दातृमहतो रितर स्त्वन्यनीचयोः ।
मन्दस्वच्छन्दयोः स्वैरः शुभ्र मुद्दीप्तशुक्लयोः ॥ १९४ ॥

ཨུ་དཱ་ར་ནི་དད་དྲི་ཆེ། ཨི་ཏ་ར་ནི་གཞན་དང་དམན།
དམན་དང་རང་འདོད་སྭཻ་རའོ། ཤུ་བྷྲ་སྣང་གསལ་དཀར་པོ་འོ། ‖ 194

चूड़ा किरीटं केशाश्च संयता मौलय स्त्रयः ।
द्रुमप्रभेदमातङ्गकाण्डपुष्पाणि पीलवः ॥ १९५ ॥

རའིའོ། གཙུག་ཕུད་ཅོད་པན་སྐྲ་དང་ནི། སཾ་ཡ་ཏཱ་རྣམས་མཽལི་གསུམ།
ཤིང་དང་རབ་དབྱེ་གླང་པོ་དང་། ཆོར་མའི་མེ་ཏོག་པཱི་ལའོ། ‖ 195

कृतान्तानेहसोः काल श्चतुर्थेऽपि युगे कलिः ।
स्यात् कुरङ्गेऽपि कमलः प्रावारेऽपि च कम्बलः ॥ १९६ ॥

མཐར་བྱེད་དུས་དག་ཀཱ་ལའོ། དུས་བཞི་ལྡན་པ་ཀ་ལིའོ།
རི་དགས་བྱེ་བྲག་ཀ་མ་ལ། ལ་བ་སྣམ་བུ་ཀམྦ་ལ།། 196

करोपहारयोः पुंसि वलिः प्राण्यङ्गजे स्त्रियाम् ।
स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः ॥ १९७ ॥

ཁྲལ་སྤྱད་གཏོར་མ་སྐྱེས་བུའོ། བ་ལི་སྒྲོག་ཆགས་ལུས་སྐྱེས་མོ།
སྟོབས་དང་ནུས་པ་དམག་དཔུང་རྣམས། བ་ལམ་སྐྱེས་བུ་བྱ་རོག་ཐོགས།། 197

वातूलः पुंसि वात्यायामपि वातासहे त्रिषु ।
भेद्यलिङ्गः शठे व्यालः पुंसि श्वापदसर्पयोः ॥ १९८ ॥

བཱ་དུ་ལ་ནི་སྐྱེས་བུ་རླུང་། རླུང་གི་ཚོགས་པོ་རྟགས་གསུམ་མོ།
དབྱེར་མེད་རྟགས་དང་གཡོ་བྱ་ལ། སྐྱེས་བུ་གཟིག་དང་སྦྲུལ་ལའོ།། 198

मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम् ।
शङ्कावपि द्वयोः कीलः पालिः स्त्र्यश्र्यङ्कपङ्क्तिषु ॥ १९९ ॥

མ་ལ་མོ་མིན་སྡིག་པ་དང་། དྲི་ཆེན་དང་ནི་དྲི་མའོ། དྲི་ཤུ་ལ་ནི་ཟུག་རྔུ་མཚོན།
ཕུར་བུ་མེ་ལྡེ་ཀཱི་ལའོ། པཱ་ལི་ཟུར་རྟགས་ཟ་ཤལ་རྣམས།། 199

कला शिल्पे कालभेदेऽप्याली सख्यावली अपि ।
अब्ध्यम्बुविकृतौ वेला कालमर्य्यादयोरपि ॥ २०० ॥

ཀ་ལཱ་བཟོད་དང་དུས་ཀྱི་དབྱེ། ཨཱ་ལི་སྤྲངས་པོ་ཕྲེང་བ་གྲིལ།
བེ་ལཱ་ཆུ་ཡི་རྣམ་འགྱུར་འཕེལ། དུས་དང་ཚུལ་ལུགས་རྣམས་ཀྱང་ངོ་॥ 200

बहुलाः कृत्तिका गावो बहुलोऽग्निः शितौ त्रिषु ।
लीला विलासक्रिययो रूपला शर्करापि च ॥ २०१ ॥

བ་ཧུ་ལ་ནི་སྨིན་དྲུག་དང་། བ་ལང་མེ་དང་ནག་པོ་གསུམ།
ལཱིལཱ་སྒེག་དང་བྱ་བ་ལ། རུ་པ་ལ་ནི་གྲོ་དུམ་དང་॥ 201

शोणितेऽम्भसि कीलालं मूलमाद्ये शिफाभयोः ।
जालं समूह आनायो गवाक्षक्षारकावपि ॥ २०२ ॥

ཁྲག་དང་ཆུ་ནི་ཀཱི་ལཱ་ལཾ། སྦུ་ལ་དང་པོ་ཙ་བའི་དོན།
ཛཱ་ལ་ཚོགས་པ་དྲ་སྐྲ་དྲ་བ॥ 202

शीलं स्वभावे सद्वृत्ते शस्ये हेतुकृते फलम् ।
छर्दि नेत्ररुजोः क्लीबं समूहे पटलं न ना ॥ २०३ ॥

ཤཱི་ལཾ་རང་བཞིན་ཚུལ་ཁྲིམས་སོ། འབྲུ་དང་རྒྱུ་བྱས་པ་ཕ་ལཾ་ངོ་།
སྙིང་གཡོགས་མིག་དང་ནད་དང་ནི། མ་ཉིང་ཚོགས་པ་པ་ཊ་ལཾ། ཕོ་མིན་ནོ॥ 203

अधःस्वरूपयोरस्त्री तलं स्याच्चामिषे पलम् ।
और्व्वानलेऽपि पातालं चेलं वस्त्रेऽधमे त्रिषु ॥ २०४ ॥

འོག་དང་ཐིལ་ནི་ཏ་ལཾ་ངོ། ཤ་ནི་པ་ལཾ།
ས་ཆུ་འོག་ནི་པཱ་ཏཱ་ལཾ། ཅེ་ལཾ་གོས་དང་ཚངས་མ་གསུམ॥ 204

कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले ।
निर्णीते केवलमिति त्रिलिङ्गं त्वेककृत्स्नयोः ॥ २०५ ॥

ཀུ་ཀྐུ་ལ་ནི་ཟུང་དང་ནི། གྲམ་པ་དོང་དང་རི་དགས་ཀྱུ།
ཕུབ་མེ་འགག་ཞིག་དང་ནི་ཀེ་བ་ལ། ཧགས་གསུམ་གཅིག་དང་མ་ལུས་པ॥ 205

पर्य्याप्तिक्षेमपुण्येषु कुशलं शिक्षिते त्रिषु ।
प्रबाल मङ्कुरेऽप्यस्त्री त्रिषु स्थूलं जड़ेऽपि च ॥ २०६ ॥

རྣམ་གྲངས་ཐོབ་དང་བདེ་བ་དང་། བསོད་ནམས་རྣམས་ཀུ་ཤ་ལ།
སློབ་མ་ཞེས་པ་གསུམ་ཡིན་ནོ། པྲ་བཱ་ལ་ནི་མྱུ་གུ་རོ།
མོ་མིན་གསུམ་པོ་སྦྲུལ་ལམ་གླེན॥ 206

करालो दन्तुरे तुङ्गे चारौ दक्षे च पेशलः ।
मूर्खेऽर्भकेऽपि बालः स्याल्लोल श्चलसतृष्णयोः ॥ २०७ ॥

ཀ་རཱ་ལ་ནི་དམའ་དང་མཐོ། མཛེས་དང་མཁས་པ་པེ་ཤ་ལ།
རྨོངས་དང་བྱིས་པ་བཱ་ལ་སྟེ། ལོ་ལོ་གཡོ་དང་འདོད་ཆེན་པོ། ལའིའོ॥ 207

दवदावौ वनारण्यवह्नी जन्महरौ भवौ ।
मन्त्री सहायः सचिवौ पतिशाखिनरा धवाः ॥ २०८ ॥

ད་བོ་དཱ་བཽ་ནགས་འཕྲོག་མེ། སྐྱེ་དང་དབང་ཕྱུག་ཧྲ་བཽ་ནི།
སྔོན་པོ་ལྷན་ཅིག་ས་རྩེ་བོ། བདག་པོ་གྲོགས་མི་དྷ་བཱའོ ॥ 208

अवयः शैलमेषार्का आज्ञाह्वानाध्वरा हवाः ।
भावः सत्वस्वभावाभिप्रायचेष्टात्मजन्मसु ॥ २०९ ॥

ཨ་པ་ཡ་རི་ལུག་ཉི་འོ། བཀའ་བསྒྲོ་འབོད་དང་མཆོད་སྦྱིན་རྣམས།
ཨཱ་ཧ་བཱའོ། བྷཱ་བ་སེམས་ཅན་སྤྲོད་པ་དང་།
དགོངས་པ་སེམས་དང་བདག་སྐྱེས་རྣམས། ॥ 209

स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने ।
अविश्वासेऽपह्नवेऽपि निकृतावपि निह्नवः ॥ २१० ॥

སྐྱེ་བ་འབྲས་བུ་མེ་ཏོག་རྣམས། བྲ་ས་བའོ་མངལ་གྲོལ་ལའང་།
ཡིད་མི་ཆེས་དང་ངན་པ་དང་། ཉེས་བྱས་རྣམས་ཀྱང་ནི་ཧྣ་བ ॥ 210

उत्सेकामर्षयोरिच्छा प्रसरे मह उत्सवः ।
अनुभावः प्रभावे स्यात् सताञ्च मतिनिश्चये ॥ २११ ॥

མཐོར་འགྲོ་སྨོད་དང་འདོད་པ་བརྒྱུད། མཆོད་པ་རྣམས་ནི་ཡུད་ས་པ།
ཨ་ནུ་བྷཱ་བ་རྟོགས་པའོ། དགོངས་པའི་བློ་གྲོས་ངེས་པ་ལ ॥ 211

स्याज्जन्महेतुः प्रभवः स्थानञ्चाद्योपलब्धये ।
शूद्रायां विप्रतनये शस्त्रे पारशवः पुमान्* ॥ २१२ ॥

ཤཱུ་དྲཱ་བ་ནི་སྐྱེ་དགུ་དང་། གནས་དང་དོན་ཐོབ་འབྱུང་གནས་སོ།། 212

ध्रुवो भभेदे क्लीवन्तु निश्चिते शाश्वते त्रिषु ।
स्वो ज्ञातावात्मनि स्वन्त्रिष्वात्मीये स्वोऽस्त्रियान्धने ॥ २१३ ॥

ཏྲུ་བ་རྒྱུ་སྐར་དབྱེ་བ་དང་། མ་ཉིང་ངེས་དང་དབུགས་པ་གསུམ།
སྭ་ནི་གཉེན་དང་བདག་དང་ནི། སྭཾ་ནི་གསུམ་སྟེ་བདག་དང་ནི།
སྭ་ནི་མོ་མིན་ནོར་ཡིན་ནོ།། 213

स्त्रीकटिवस्त्रबन्धेऽपि नीवी परिपणेऽपि च ।
शिवा गौरीफेरवयोर्द्वन्द्वं कलहयुग्मयोः ॥ २१४ ॥

ནཱི་བི་བུད་མེད་ཀེད་གོས་དང་། ཚོང་པའི་ཟོང་རྣམས་ལ་ཡང་ངོ་།
ཤི་བཱ་ཨུ་མ་ལྕེ་སྤྱང་ངོ་། དྭན་དྭཾ་འཐབ་མོ་ཟུང་རང་བཞིན།། 214

द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु ।
क्लीवं नपुंसके षण्ढे वाच्यलिङ्गमविक्रमे ॥ २१५ ॥

དྲ་བྱཱ་ཟས་དང་རྩོམ་པའོ། སཏྭ་མོ་མིན་སེམས་ཅན་ནོ།
ཀླཱི་བཾ་མ་ནིང་ཟ་མ་སྟེ། བརྗོད་བྱའི་རྟགས་ཅན་རྣམ་པར་གནོན།། 215

---

* This line seems to be an interpolation in Sanskrit.

द्वौ विशौ वैश्यमनुजौ द्वौ चराभिमरौ स्पशौ ।
द्वौ राशी पुञ्जमेषाद्यौ द्वौ वंशौ कुलमस्करौ ॥ २१६ ॥

ལྦའི་འོ། གསུམ། བི་ཤཻ་ཛྙེ་རིགས་མི་དག་གོ།
གཉིས། སྤྱོད་པ་མངོན་སྤྱོད་སྤྲཀྲོ། གཉིས།
ར་ཤཱི་སྤུང་པོ་ལུག་སོགས་ཁྲིམ། གཉིས། བཾ་ཤཽ་རིགས་དང་འོད་མའོ།། 216

रहः प्रकाशौ वीकाशौ निर्व्वेशो भृतिभोगयोः ।
कृतान्ते पुंसि कीनाशः क्षुद्रकर्षकयोस्त्रिषु ॥ २१७ ॥

དབེན་དང་གསལ་བ་བཱི་ཀཱ་ཤོ། ཁྲུབ་བདག་ལོངས་སྤྱོད་ཉེར་བེ་ཤོ།
མཐར་བྱེད་སྐྱེས་བུ་ཀཱི་ནཱ་ཤ། སེར་སྣ་དང་ནི་འཁྲིངས་པ་གསུམ།། 217

पदे लक्ष्ये निमित्तेऽपदेशः स्यात् कुशमप्सु च ।
दशावस्थानेकविधाप्याशा तृष्णापि चायता ॥ ॥ २१८ ॥

རྒྱུ་ཐབས་མཚན་ཉིད་རྟགས་ཨ་པ་དེ་ཤ། ཀུ་ཤ་ཙ་དང་ཆུ་ཡིན་ནོ།
ད་ཤ་གནས་སྐབས་སུམ་མེད་དོ། ཨཱ་ཤཱ་སྲེད་པ་རིང་པོ་འོ།། 218

वशा स्त्री करिणी च स्याद्दृग्ज्ञाने ज्ञातरि त्रिषु ।
स्यात् कर्कशः साहसिकः कठोरामसृणावपि ॥ २१९ ॥

བ་ཤཱ་གླང་མོ་དབང་དུ་བྱེད། དྲི་ཤ་ཤློ་དང་མིག་ཡིན་གསུམ།
ཀཀྐ་ཤ་ནི་དཔའ་བརྟུལ་དང་། སྲ་བ་དང་ནི་གྲོང་བའོ།། 219

प्रकाशोऽतिप्रसिद्धेऽपि शिशावज्ञे च बालिशः ।
सुरमत्स्यावनिमिषौ पुरुषावात्ममानवौ ॥ २२० ॥

པྲ་ཀཱ་ཤ་ནི་རབ་གསལ་གྲགས། བྱིས་པའི་བླུན་པོ་བ་ལི་ཤ།
ལྷ་དང་ཉ་ནི་མིག་མི་འཛུམས། པུ་རུ་ཥ་ནི་བདག་དང་མིང་། ॥ 220

काकमत्स्यात्खगौ ध्वाङ्क्षौ कक्षौ तु तृणवीरुधौ ।
अभीषुः प्रग्रहे रश्मौ प्रैषः प्रेषणमर्दने ॥ २२१ ॥

བྱ་རོག་ཉ་དང་མཁའ་འགྲོ་དྷྭཱཾ་ཀྵཱཾ། ཀ་ཀྵཱཾ་རྩྭ་དང་འབྲི་ཤིང་ངོ་།
ཨ་བྷཱི་ཥུ་ནི་སྲ་བ་འོད་ཟེར། པྲེ་ཥ་འགྱེད་དང་ཉེད་པའོ། ॥ 221

पक्षः सहायेऽप्युष्णीषः शिरोवेष्ट-किरीटयोः ।
शुक्रले मूषिके श्रेष्ठे सुकृते वृषभे वृषः ॥ २२२ ॥

པཀྵ་ཕྱོགས་དང་ལྷན་ཅིག་འགྲོ། ཨུ་ཥྞཱི་ཥ་ནི་ཙུག་ཏོར་དང་།
ཐོད་དང་ཅོད་པན་དག་ལའོ། བརླིག་པ་བྱི་བ་མཆོག་དང་ནི།
ལེགས་པ་བྱས་ཁྱུ་མཆོག་བྲི་ཥའོ ॥ 222

कोषोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः ।
द्यूते ऽक्षे सारिफलकेऽप्याकर्षोऽथाक्षमिन्द्रिये ॥ २२३ ॥

ཀོ་ཥ་མོ་མིན་གྲོལ་མེད་*དང་། རལ་གྲི་ཤུབས་དང་དོན་ཚོགས་མཐའ།
ཨ་ཀྵ་ཤོ་དང་ཤོ་ཡི་སྣུན། འགུགས་པ་ལའོ་དེ་ནས་ནི།
ཨཀྵ་དབང་པོ་ཤོ་ལུས་འདྲེན॥ 223

---

* For སྦལ་མིག ?

ना द्यूताङ्गे कर्षचक्रे व्यवहारे कलिद्रुमे ।
कर्षूर्वार्त्ता करीषाग्निः कर्षूः कुल्याभिधायिनी ॥ २२४ ॥

འཁོར་ལོ་ཆོས་ལུགས་རྩོད་པའི་ཤིང་། ཀརྵུ་བཞིན་དང་ལྕི་བའི་མེ།
ཀརྵཱུ་འགྲམ་དང་བརྗོད་བྱའོ།། 224

पुम्भावे तत् क्रियायाञ्च पौरुषम् विषमस्तु च ।
उपदानेऽप्यामिषं स्यादपराधेऽपि किल्विषम् ॥ २२५ ॥

སྐྱེས་བུ་དངོས་བཞིན་བྱ་བ་དང་། པོ་རུ་ཥཾ། བི་ཥཾ་དུག་དང་ཆུ་ཡིན་ནོ།
ཉེར་འབུལ་ཤ་དག་ཨཱ་མི་ཥཾ*། གནོད་བྱེད་སྡིག་པ་ཀི་ལྦི་ཥཾ།། 225

स्याद्दृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम् ।
प्रेक्षा नृत्येक्षणं प्रज्ञा भिक्षा सेवार्थना भृतिः ॥ २२६ ॥

ཆར་དང་འཇིག་རྟེན་ཁམས་ཆ་ལོ་ནམ་བརྵ། མོ་མིན་ནོ།
པྲེཀྵཱ་གར་ལྟ་ཤེས་རབ་པ། བྷིཀྵཱ་ཞབས་ཐོག་སློང་དང་གྲྭ།། 226

त्विट् शोभाऽपि त्रिषु परे न्यक्षं कार्त्स्न्यनिकृष्टयोः ।
प्रत्यक्षेऽधिकृतेऽध्यक्षो रुक्षस्त्वप्रेम्न्यचिक्कणे ॥ २२७ ॥

ཏྭི་ཥ་མཛེས་དང་འོད་གསུམ་གཞན། ཉེས་ཀུན་དག་ནི་ཀྲི་ཥྚ།
མངོན་སུམ་བཀའ་ལུང་ཨ་དྷྱཀྵ། རུཀྵ་མི་མཐུན་པ་དང་རྩུབ།། 227

---

* For ཨཱ་མི་ཥཾ ?

रविश्वेतच्छदौ हंसौ सूर्य्यवह्नी विभावसू ।
वत्सौ तर्णकवर्षौ द्वौ सारङ्गाश्च दिवौकसः ॥ २२८ ॥

ཧ་འི་འོ། ཉི་མ་དང་སྐྱ་ཧྃ་སོ་སོ། ཉི་མ་མེ་འོད་བ་སུའོ།
བཏྶཱ་བྱེའུ་ལོ་དག་གཉིས། ཁྲུང་ཧ་མགྲོ་རི་དི་བོ་ཀས།། 228

शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः ।
पुंस्युत्तंसाऽवतंसौ द्वौ कर्णपूरेऽपि शेखरे ॥ २२९ ॥

སྒེག་པ་ལ་སོགས་ཉམས་དང་ནི། དུག་དང་ཐིག་ལེ་ཡོན་ཏན་ཆགས།
ཁུ་བ་རྣམས་ལ་ར་སའོ། ཨུཏྟཾ་ས་དང་ཨ་བ་ཏཾ་སོ། གཉིས།
རྣ་བའི་སྟེང་རྒྱན་ཐོད་ལའོ།། 229

देवभेदेऽनले* रश्मौ वसू रत्ने धने वसु ।
विष्णौ च वेधाः स्त्री त्वाशीर्हिताशंसाऽहिदंष्ट्रयोः ॥ २३० ॥

ལྷ་དང་དབྱེ་བ་ལྷུང་དང་ནི། འོད་ཟེར་དངོས་པོ་རིན་ཆེན་དང་།
ནོར་རྣམས་ལ་ནི་བ་སུའོ། ཁྱབ་འཇུག་ཀུང་ནི་བེ་དྷཱ་ས།
མོ་ཉིད་ཨཱ་ཤཱིས་ཉིད་ནི། ཕན་སེམས་སྦྲུལ་གྱི་མཆེ་བའོ།། 230

लालसे प्रार्थनौत्सुक्ये हिंसा चौर्य्यादि कर्म्म च ।
प्रसूरश्वापि भूद्यावौ रोदस्यौ रोदसी च ते ॥ २३१ ॥

ལ་ལ་ས་ནི་སློང་དང་སྲེད། ཧིཾ་ས་རྐུ་བ་ལ་སོགས་ལས།
པྲ་སུ་མ་དང་རྒོད་མའོ། ས་དང་ནམ་མཁའ་རོ་དང་སོ།། 231

---

* Tibetan reads : अनिले ।

ज्वालाभासो नपुंस्यऽर्च्चि र्ज्योतिर्भद्योतदृष्टिषु ।
पापापराधयोरागः खगबाल्यादिनोर्व्वयः ॥ २३२ ॥

འོད་ཟེར་ཀྱང་ངོ་། ཏྲི་ས་འབར་དང་མ་ཉིང་ངོ་། ཨ་རྩིས་ནི་འོད་སྣང་སིག།
སྡིག་དང་ཉེས་པ་ལ་ཨ་གཱ་སོ། མཁའ་འགྲོ་ནི་མཉམ་པ་ཡས॥ 232

तेजः पुरीषयोर्वर्च्चौ महस्तूत्सवतेजसोः ।
रजोगुणे स्त्रीपुष्पे च राहौ ध्वान्ते गुणे तमः ॥ २३३ ॥

འོད་དང་བ་ཤང་ལམ་བཙྪས། ཆེན་པོ་སྤྲོ་བ་དེ་ཛ་ས།
ར་ཛ་ས་ཡོན་ཏན་མོ་ཟླ་མཚན། སྒྲ་གཅན་མུན་པ་ཡོན་ཏན་གཏམས॥ 233

छन्दः पद्येऽभिलाषे च तपः कृच्छ्रादि कर्म्म च ।
सहोबलं सहामार्गौ नभः खं श्रावणे नभाः ॥ २३४ ॥

ཚྪ་ནྡས་ཚིགས་པ་ཅན་མངོན་འདོད། ད་པས་དཀའ་ཐུབ་ལ་སོགས་ལས།
ས་ཧས་སྟོབས་དང་མཉམ་མགོ་ཟླ། ན་བྷས་མཁའ་འགྲོ་གྲི་ཞུན་*ན་བྷཱས॥ 234

ओकः सद्माश्रयश्चौकाः पयः क्षीरं पयोऽम्बु च ।
ओजो दीप्तौ बले स्रोत इन्द्रिये निम्नगारये ॥ २३५ ॥

ཨོ་ཀས་ཁྲི་དང་རྟེན་ཨོ་ཀས། པ་ཡཿའོ་མ་པོ་སོ་ཆུ།
ཡོ་ཛས་དང་ནི་འོད་དང་སྟོབས། སྲོ་ཏས་དབང་པོ་གཙང་པོ་ཁྲིམ॥ 235

---

* For གྲ་བཞིན ?

तेजः प्रभावे दीप्तौ च बले शुक्रेऽप्यतस्त्रिषु ।
विद्वान् विदंश्च बीभत्सो हिंस्रोऽप्यतिशये त्वमी ॥ २३६ ॥

ཏེ་ཛས་ནུས་མཐུ་སྒྲོན་མ་དང་། སྤོབས་དང་ཁུ་བ་རྣམས་ལའོ།
ཝཱི་དྭཱ་ས་ནི་རིག་པའོ། བཱི་བྷཏྶུ་ནི་རྣམས་འཚེའོ།
འདི་རྣམས་འཕེལ་དང་ཤིས།། 236

वृद्धप्रशस्ययोर्ज्यायान् कनीयांस्तु युवाल्पयोः ।
वरीयांस्तूरुवरयोः साधीयान् साधुवाढयोः ॥ २३७ ॥

ཀ་ནཱི་ཡཾ་སུ་གཞོན་ཆུང་། བ་རཱི་ཡཾ་དུ་བརླ་དང་རབ།
སཱ་དྷཱི་ཡཱ་ན་ལེགས་ཤིན་དུ། སའི་འོ།། 237

दलेऽपि वर्हं निर्ब्बन्धोपरागार्कादयो ग्रहाः ।
द्वार्य्यापीड़े क्वाथरसे निर्य्यूहो नागदन्तके ॥ २३८ ॥

འདབ་མ་རྨ་བྱའི་མདོངས་བརྟེ། ཁྲིས་གདོན་གཟའ་སོགས་གྲ་ཧའོ།
སྒོ་ཁྱུང་ཐོད་དང་བསྐོལ་དང་ནི། ནེར་ཡུ་ཧའོ་གླང་ཆེན་སོ།། 238

तुलासूत्रेऽश्वादिरश्मौ प्रग्राहः प्रग्रहोऽपि च ।
पत्नी परिजनादानमूलशापाः परिग्रहाः ॥ २३९ ॥

སྲབ་ཐག་རྟ་ལ་སོགས་པའི་སྲབ། པྲ་གྲ་ཧ་དང་གྲ་ཧ་ཡང་ངོ།
ཆུང་མ་འཁོར་བཅས་ལེན་པ་རྩྭ། མནའ་རྣམས་པ་རི་གྲ་ཧའོ།། 239

दारेष्वपि गृहाः श्रोण्यामप्यारोहो वरस्त्रियाः ।
व्यूहो वृन्देऽप्यहिर्वृत्रेऽप्यग्नीन्द्वर्का स्तमोपहाः ॥ २४० ॥

བུད་མེད་ཁྱིམ་བདག་འཛིན་པའོ། ཆུ་སོ་དང་ནི་བུད་མེད་མཆོག།
ཨ་རོ་ཧེ་འོ་བྱུ་ཧ་ཚོགས། ཨ་ཧི་སྦྲུལ་དང་ལྷ་མིན་ནོ།
མེ་ཟླ་ཉི་མ་མུན་པ་འཇོམས།། 240

परिच्छदे नृपार्हेऽर्थे परिवर्होऽव्ययाः परे ॥ २४१ ॥

ཡོངས་གཅོད་མི་དབང་ཡོ་བྱད་ནི། པ་རི་བརྷོ་མི་ཟད་ཕྱི།། 241

इति नानार्थवर्गः ।

སྣ་ཚོགས་དོན་སྡེའོ།།

अव्ययवर्गः ।

आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ।
आ प्रगृह्यः स्मृतौ वाक्येऽप्यास्तु स्यात् कोपपीड़योः ॥ १ ॥

མི་ཟད་པའི་སྡེ་ཚན་ནོ །།

ཨཱང་ཆུང་དང་མངོན་པར་ཁྱབ། མཚམས་དོན་དབྱེབས་དག་སྦྱོར་ལས་སྐྱེས།
ཨཱ་ནི་མཚམས་མི་སྦྱོར་བ་དང་། དྲན་པ་དང་ནི་ངག་ལ་ཡང་།
ཨཱ་ནི་ཁྲོ་བ་ཟུག་རྔུ་དག། 1

पापकुत्सेषदर्थे कु धिङ्निर्भर्त्सननिन्दयोः ।
चान्वाचये समाहारेतरेतरसमुच्चये ॥ २ ॥

སྡིག་དང་ངན་པ་ཉུང་ངུ་ཀུ། ཧྲིང་ནི་བསྡིགས་ཚིག་*དམོད་པ་དག།
ཙ་ནི་ཞར་བྱུང་བསྡུ་བ་དང་། རེ་རེ་བ་དང་ཀུན་ལས་བསྡུ།། 2

स्वस्त्याशीःक्षेमपुण्यादौ प्रकर्षे लङ्घनेऽप्यति ।
स्वित् प्रश्ने च वितर्के च तु स्याद्भेदेऽवधारणे ॥ ३ ॥

སྭ་སྟི་ཤིས་པ་བདེ་ལེགས་དང་། བསོད་ནམས་ལ་སོགས་ཤིན་ཏུ་དགའ།
མཚོངས་པ་ལ་ཡང་ཨ་ཏིའོ། སྭིད་འདྲི་དང་རྣམ་རྟོག་གོ།
ཏུ་ནི་དབྱེ་བ་དམིགས་འཛིན་པ།། 3

* For འཕྱ་ཚིག ?

सकृत् सहैकवारे स्यादाराद्दूरसमीपयोः ।
प्रतीच्यां चरमे पश्चादुताप्यर्थविकल्पयोः ॥ ४ ॥

ས་ཀྲིད་ལྷན་དུ་ལྷན་ཅིག་པར། རཱ་ཏ་ནི་རི་དང་ས་གཅིག་དག།
ནུབ་ཕྱོགས་ཕྱི་མ་པ་ཤྩད་དོ། ཨུ་དའི་དོན་ནི་བརྟག་དཔྱད་དག།། 4

पुनः सदार्थयोः शश्वत् साक्षात् प्रत्यक्षतुल्ययोः ।
खेदानुकम्पासन्तोषविस्मयामन्त्रणे वत ॥ ५ ॥

ཡང་དང་རྟག་ཏུ་དོན་ཤ་ཤྭད། སཱ་ཀྵཱ་མངོན་སུམ་དང་མཚུངས་པ།
སེམས་སྡུག་རྗེས་སུ་བརྩེ་བ་དང་། ཉེ་བར་ཚིམ་པ་ངོ་མཚར་དང་།
སྐྱན་ཅོག་པ་ནི་བ་དའོ།། 5

हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ।
प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः ॥ ६ ॥

ཧནྟ་དགའ་དང་ཉེར་བརྩེ་དང་། ངག་དང་རྩོམ་པ་དུག་ལ་སོགས།
པྲ་ཏི་མཚོན་བྱེད་ཁྱབ་འདོད་དང་། མཚན་ཉིད་ལ་སོགས་རབ་འགྱུར་ལ།། 6

इति हेतुप्रकरणप्रकर्षादिसमाप्तिषु ।
प्राच्यां पुरस्तात् प्रथमे पुरार्थेऽग्रत इत्यपि ॥ ७ ॥

ཨི་ཏི་རྒྱུ་མཚན་གནས་སྐབས་དང་། གསལ་བྱེད་སོགས་པ་རྫོགས་རྣམས་ལ།
པུ་ར་སྟཱད་ནི་ཤར་ཕྱོགས་དང་། དང་པོ་སྔོན་དོན་མདུན་ཞེས་པ་འང་།། 7

यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ।
मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ॥ ८ ॥

ཇི་སྙེད་དེ་སྙེད་སཱ་ཀ་ལྱེ། བར་མཚམས་ཚད་དང་དམིགས་འཛིན་ནོ།
བཀྲ་ཤིས་རྒྱུན་མི་འཆད་དང་རྩོམ། འདྲི་དང་ཀུན་ལ་ཨ་ཐོ་ནོ། དེ་ནས॥ 8

वृथा निरर्थकाविध्यो र्नानानेकोभयार्थयोः ।
नु पृच्छायां विकल्पे च पश्चात्सादृश्ययोरनु ॥ ९ ॥

བྲི་ཐཱ་*དོན་མེད་བྱ་བ་མིན། ནཱ་ནཱ་སྣ་ཚོགས་གཉིས་དོན་དག།
ནུ་ནཱི་དྲི་བ་རྣམ་རྟོག་དང་། ཕྱི་མ་འདྲ་དག་ཨ་ནུའོ॥ 9

प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु ।
गर्हा-समुच्चय-प्रश्न-शङ्का-सम्भावनास्वपि ॥ १० ॥

འདྲི་བ་དམིགས་འཛིན་རྗེས་སྣྲ†། ཡིད་གཙུགས་འབོད་པ་ན་ནུའོ།
སྨོད་དང་ཀུན་བསྡུས་འདྲི་བ་དང་། བརྟག་པ་འབྱུང་འགྱུར་ཨ་པིའོ॥ 10

उपमायां विकल्पे वा सामि त्वर्द्धे जुगुप्सने ।
अमा सह समीपे च कं वारिणि च मूर्द्ध्नि च ॥ ११ ॥

ཉེར་འཛལ་འདམ་ཁ་བཱ་ཡིན་ནོ། སཱ་མི་ཕྱེད་དང་སྨོད་པའོ།
ཨ་མཱ་ལྷན་ཅིག་ས་གཅིག་དང་། ཀཾ་ནི་ཆུ་དང་སྤྱི་བོ་ལ॥ 11

---

* Tib: བྲ་ཁྲ། † For རྗེས་གོ ?

इवेत्थमर्थयो रेवं नूनं तर्केऽथ निश्चये ।
तूष्णीमर्थे सुखे जोषं किम्पृच्छायां जुगुप्सने ॥ १२ ॥

དཔེ་དང་འདི་ཡི་དོན་ཨེ་ཝཾ། ནཱུ་ནཾ་རྟོག་དོན་ཨེ་ཝཾ།
ནཱུ་ནཾ་རྟོག་དོན་ངེས་པའོ། མི་སྨྲའི་དོན་བདེ་ཛོ་ཥཾ་ངོ།
ཀིཾ་ནི་དྲི་དང་སྨོད་པ་ལ།། 12

नाम प्राकाश्य-सम्भाव्य-क्रोधोपगम-कुत्सने ।
अल म्भूषणपर्य्याप्तिशक्तिवारणवाचकम् ॥ १३ ॥

ནཱ་མ་སྟོན་བྱེད་འབྱུང་བ་དང་། ཁྲོ་དང་ཁས་ལེན་ངན་པའོ།
ཨ་ལཾ་རྒྱན་དང་རྣམ་གྲངས་ཐོབ། མཐུང་ཐུང་དང་ནི་ཚིག་ཚིག་ལ།། 13

हुं वितर्के परिप्रश्ने समयान्तिकमध्ययोः ।
पुन रप्रथमे भेदे नि निश्चयनिषेधयोः ॥ १४ ॥

ཧཱུཾ་ནི་རྣམ་རྟོགས་ཡོངས་སུ་འདྲི། ས་མ་ཡ་ནི་ཉེ་ཚོམ་དབུས།
པུ་ན་དང་པོ་མ་ཡིན་དབྱེ། ནིཿ་ནི་ངེས་ཚིག་དགག་པ་དག། ཡིན།། 14

स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा ।
ऊरर्य्यूरी चोररी च विस्तारेऽङ्गीकृतौ त्रयम् ॥ १५ ॥

པྲ་བནྡྷ་ནི་དུས་རིང་འདས། ཉེ་འཁོར་འབྱུང་འགྱུར་སྔོན་ལ་རིང་།
ཨཱུ་ར་ཨཱུ་རི་ཙ་ཨུ་རི། རྒྱ་ཞིང་ཁས་ལེན་བྱས་དག་གསུམ།། 15

स्वर्गे परे च लोके स्व र्वार्त्तासम्भाव्ययोः किल ।
निषेधवाक्यालङ्कारजिज्ञासानुनये खलु ॥ १६ ॥

མཐོ་རིས་པ་རོལ་འཇིག་རྟེན་སྐུར། གདམ་དང་འབྱུང་བ་དག་ཀྱི་ལ།
དགག་པ་ཚིག་གི་རྒྱན་དང་ནི། ཞེས་འདོད་བཙུགས་པ་ཁ་ལུའི༎ 16

समीपोभयतः शीघ्रसाकल्याभिमुखेऽभितः ।
नामप्रकाशयोः प्रादु र्मिथोऽन्योऽन्यं रहस्यपि ॥ १७ ॥

གཅིག་གཉིས་དང་མྱུར་བ་དང་། ཐམས་ཅད་མངོན་ཕྱུར་ཨ་བྷི་ཏ།
མིང་དང་གསལ་བྱེད་པྲཱ་དུ་ར། མི་ཐོ། བརྫུན་དང་ཕན་ཚུན་དབེན་པ་ཡང་༎ 17

तिरो ऽन्तर्द्धौ तिर्य्यगर्थे हा विषादशुगर्त्तिषु ।
अहहेत्यद्भुते खेदे हि हेताववधारणे ॥ १८ ॥

ཏི་རོ་བསྒྲིབས་དང་དུད་འགྲོའི་དོན། ཧཱ་ནི་སྡུག་བསྔལ་མྱ་ངན་ལ།
ཨ་ཧ་ཧ་ནི་རྨད་དུ་བྱུང་། སེམས་སྡུག་ཧི་ནི་རྒྱུ་མཚན་དམིགས་འཛིན་ནོ༎ 18

चिराय चिरराचाय चिरस्याद्याश्चिरार्थकाः ।
मुहुः पुनःपुनः शश्वदभीक्ष्ण मसकृत् समाः ॥ १९ ॥

དོན་སྣ་ཚོགས་ཀྱི་སྒྲེ་ཚན་ནོ། རྒྱུན་རིང་ཡུན་རིང་རིང་པོ་དང་།
དུས་རིང་པོ་ལ་སོགས་པའི་དོན། ཡང་དང་སླར་དང་སླར་དང་ནི།
སླར་ཡང་ཡང་ཡང་གཅིག་མིན་མཚུངས༎ 19

स्राग् झटित्यञ्जसाह्नाय द्राङ् मंक्षु सपदि द्रुते ।
बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरे ॥ २० ॥

མགྱོགས་མྱུར་ཀྱེན་དང་ཡུད་ཙམ་དང་། དེ་མ་དག་དང་མི་སྡོད་མྱུར།
ཤིན་ཏུ་ནན་ཏར་ཧ་ལས་དང་། སུ་དང་ཨ་ཏི་ཤིན་ཏུའི་དོན॥ 20

पृथग्विनान्तरेणर्त्ते हिरुङ्नाना च वर्जने ।
यत्तद्यतस्ततो हेता वसाकल्ये तु चिन्वन ॥ २१ ॥

སོ་སོར་རེ་རེ་མཐར་བྱས་དང་། ཏུ་ར་*ཧི་རུག་ནཱ་ནཱ་བོར།
ཡཏ་ཏཏ་གང་ལས་དེ་ལས་རྒྱུ། ཐམས་ཅད་མ་ཡིན་ཀི་ཙི་ཏ† ॥ 21

कदाचिज्जातु सार्द्धन्तु साकं सचा समं सह ।
आनुकूल्यार्थकं प्राध्वं व्यर्थके तु वृथा मुधा ॥ २२ ॥

ཀ་དཱ་ཙིད་ནི་ནམ་ཞིག་གོ། ལྷན་གཅིག་དུས་གཅིག་མཉམ་མཚུངས་ལྷན།
མཐུན་ཕྱོགས་དོན་དང་མཐུན་པའོ། དོན་མེད་བྱུར་མེད་དོན་མེད་དོ॥ 22

आहो उताहो किमुत विकल्पे किं किमूत च ।
तु हि च स्म ह वै पादपूरणे पूजने स्वति ॥ २३ ॥

རྟོག་པ་རྣམ་རྟོག་བརྟག་པ་དང་། འདམ་ཁ་ཅི་ཞིག་རྣམ་པར་རྟོག།
ཏུ་ཧི་ཙ་སྨྲ་ཧ་དང་བཻ། ཚིག་གི་ཁ་སྐོང་དོན་ཡིན་ནོ།
སུ་དང་ཨ་ཏི་མཆོད་པའི་བྱ॥ 23

---

* For རྀ་ཏེ ?   † For ཙིནྟ་ན ?

दिवाह्नीत्यथ दोषा च नक्तञ्च रजनाविति ।
तिर्य्यगर्थे साचि तिरोऽप्यथ सम्बोधनार्थकाः ॥ २४ ॥

ཉིན་མོ་ཐུན་དང་དེ་ནས་ནི། ཉིས་མཚན་ནམ་ཞེས་བྱ་བའོ།
དུར་འགྲེའི་དོན་དང་སཱ་ཙི་ཐུག། དེ་ནས་བོད་པའི་དོན་ཡིན་ནོ། ༎ 24

स्युः प्याट् पाड़ङ्ग है हे भोः समया निकसा हिरुक् ।
अतर्किते तु सहसा स्यात्पुरः पुरतोऽग्रतः ॥ २५ ॥

པྱཱཊ་པཱཊཾ་ག། ཧེ་ཧི་བྷོ་རྣམས་འབོད་པའོ། ལྷན་ཅིག་པ་གཅིག་ཉེས་འཁོར་རོ།
མ་བརྟགས་པ་དང་མ་དཔྱད་པ། སྔོན་མ་སྔ་མ་མདུན་མའོ། ༎ 25

स्वाहा देवहविर्दाने श्रौषड् वौषड् वषट् स्वधा ।
किञ्चिदीषन्मनागल्पे प्रेत्यामुत्र भवान्तरे ॥ २६ ॥

སྭཱ་ཧཱ་ལྷ་ཡི་བསྲེག་རྫས་སྦྱིན། ཤྲཽ་ཥཊ་བ་ཥཊ་རྣམས་བདུད་རྩི་སྦྱིན་པའོ།
ཅུང་ཟད་བག་ཙམ་ཉུང་ཚུང་ངུ། ཡི་དྭགས་བར་དོ་སྲིད་པ་བར། ༎ 26

वद्वा यथा तथैवैवं साम्येऽहो ही च विस्मये ।
मौने तु तूष्णीं तूष्णीकां सद्यः सपदि तत्क्षणे ॥ २७ ॥

འདྲ་དང་ཇི་ལྟར་དེ་ལྟར་དང་། དེ་ལྟ་བུ་དང་མཉམ་པའོ།
ཨ་ཧོ་ཧི་དང་ངོ་མཚར་རོ། སྨྲ་བཅད་མི་སྨྲ་དུཥྞཱི་ཀཾ།
སདྱ་ཅིག་ཅར་དེ་མ་ཐག ༎ 27

दिष्ट्या श मुपजोषं चेत्यानन्देऽथान्तरेऽन्तरा ।
अन्तरेण च मध्ये स्युः प्रसह्य तु 'हठार्थकम् ॥ २८ ॥

བདེ་དང་དགྱེས་པ་མཉེས་དང་དགའ། དེ་ནས་བར་དང་དཀྱིལ་དང་ནི།
ཉང་དང་དབུས་མ་ཞེས་པའོ། མཐུ་དང་སྟོབས་ཀྱི་དོན་ཡིན་ནོ།། 28

युक्ते द्वे साम्प्रतं स्थानेऽभीक्ष्णं शश्वदनारते ।
अभावे नह्यनो नापि मास्म मालञ्च वारणे ॥ २९ ॥

ཟུང་དང་ཕྲུགས་དང་ད་ལྟར་གནས། སླར་དང་ཡང་ཡང་དྲག་ཏུའོ།
མེད་དགག་ན་ཧི་ཨ་དང་ནི། དགག་མེད་དགག་ཆོག་ཆོག་གོ།། 29

पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धाञ्जसा द्वयम् ।
प्राकाश्ये प्रादु राविः स्यादोमेवं परमं मते ॥ ३० ॥

ཕྱོགས་ཕྱི་མ་དང་ཙེ་སོགས་ཙ། དེ་ཁོ་ན་ཉིད་གཉིས་མེད་དང་།
དབྱེར་མེད་གཉིས་སུ་མེད་པའོ། རབ་སྟོན་གསལ་དང་ཐམ་པ་ཡིན།
ཨོཾ་དང་ཨེ་ཝཾ་མཆོག་ཏུ་འདོད།། 30

समन्ततस्तु परितः सर्व्वतो विष्वगित्यपि ।
अकामानुमतौ काम मसूयोपगमेऽस्तु च ॥ ३१ ॥

མཐའ་དག་ཡོངས་སུ་ཐམས་ཅད་ཀུན། མི་འདོད་ཁས་ལེན་ཀི་མིང་ངོ།
བསྡིང་ཆོག་ཁས་ལེན་ཨ་དུ་ཙུ།། 31

ननु च स्याद् विरोधोक्तौ कच्चित् कामप्रवेदने ।
निःषमं दुःषमं गर्ह्ये यथास्वन्तु यथायथम् ॥ ३२ ॥

འགལ་དང་མི་མཐུན་པར་སྨྲ་བ། ཀ་ཙིཏ྄་སྐྱོང་བར་འདོད།
སྡུག་པ་མ་རུངས་ངན་པ་དང་། རང་ཉིད་ཇི་ལྟར་ཇི་བཞིན་ལྟར། ॥ 32

मृषा मिथ्या च वितथे यथार्थन्तु यथातथम् ।
स्युरेवन्तु पुनर्व्वैवेत्यवधारणवाचकाः ॥ ३३ ॥

ཤེས་བཞིན་བརྫུན་དང་མི་བདེན་པ། ཇི་ལྟའི་དོན་དང་ཇི་དེ་ལྟར།
སྱུ་དང་ཨེ་ཝཾ་དུ། པུནཿཝེ་དང་ཙ་དང་ཨེ་དེ་ནི།
དམིགས་ཀྱིས་དབྱེ་བའི་ཚིག་ཡིན་ནོ། ॥ 33

प्रागतीतार्थकं नूनमवश्यं निश्चये द्वयम् ।
संवद्वर्षेऽवरेत्वर्व्वागामेवं स्वयमात्मना ॥ ३४ ॥

པྲཱ་ག་འདས་པའི་དོན་ཡིན་ནོ། ནཱུ་ན་ལོས་ཀྱང་ངེས་པ་གཉིས།
ལོ་དང་ལོ་འི་ཕྱི་མ་ཉིང་། ཨ་མ་དེ་བཞིན་རང་དང་བདག ॥ 34

अल्पे नीचै र्महत्युच्चैः प्रायो भूम्न्यद्रुते शनैः ।
सना नित्ये वहिर्वाह्ये स्मातीतेऽस्तमदर्शने ॥ ३५ ॥

ཉུང་དང་དམའ་ཆེ་དང་མཐོ། མང་པོ་ཕལ་ཆེར་འགྲོ་དང་འགུལ།
རྟག་ཏུ་རྒྱུན་དུ་ཕྱི་དང་ཕྱི། འདས་དང་མི་མཐོང་མི་མངོན་ནོ། ॥ 35

अस्ति सत्वे रुषोक्तावूङ् उं प्रश्नेऽनुनये त्वयि ।
हूं तर्के स्यादुषा रात्रेरवसाने नमो नतौ ॥ ३६ ॥

ཡོད་དང་བདོག་གོ་ཁྲོ་ཚིག་ཨུཾ། ཨུཾ་ནི་དྲི་དང་མཉེས་གཤིན་ཚིག།
ཧཱུྃ་ནི་རྟོག་གེ་ཨུ་ཥཱ་ནི། ནམ་གྱི་ཆ་སྨད་ཕྱག་དང་འདུད།། 36

पुनरर्थेऽङ्गनिन्दायां दुष्ठु सुष्ठु प्रशंसने ।
सायं साये प्रगे प्रातः प्रभाते निकषान्तिके ॥ ३७ ॥

བོད་པ་ཡང་དོན་ཨངྒ་ནི། སྨོད་དང་ངན་སླ་བསྟོད་ཞེས་ཚིག།
དགོངས་མ་ཉི་མཐའ་ནམ་ལངས་སྔ། ས་གཅིག་པ་དང་*ཀནྟི་ཀེ།། 37

परुत्परार्य्यैषमोऽब्दे पूर्व्वे पूर्व्वतरेयति ।
अद्यात्राह्न्यथ पूर्व्वेह्नीत्यादौ पूर्व्वोत्तरापरात् ॥ ३८ ॥

ན་ནིང་གཞི་ནིང་ད་ལོ་དང་། ལོ་སྔོན་མ།
ན་ནིང་གཞི་ནིང་པ་ལོ་འོ། དེ་རིང་འོད་དེ་རིང་གིའོ།
དེ་ནས་སྔོན་མིང་ཐུན་ལ་སོགས། སྔོན་མ་ཕྱི་མ་གཞན་དང་ནི།། 38

तथाधरान्यान्यतरेतरात् पूर्व्वेद्युरादयः ।
उभयद्युश्चोभयेद्युः परे त्वह्नि परेद्यवि ॥ ३९ ॥

དེ་བཞིན་དུ་ནི་གཞན་དང་གཞན། སྔོན་མའི་ཉི་མ་ལ་སོགས་པ།
ཉི་མ་གཉིས་པ་གནངས་ཉིན་མོ། ཕྱི་དྲོའི་ཐུན་ནི་པ་རེ་བཀྲུ།། 39

---

* For ཨནྟི་ཀེ ?

ह्योगतेऽनागतेऽह्नि श्वः परश्व स्तत्परेऽहनि ।
तदा तदानीं युगपदेकदा सर्व्वदा सदा ॥ ४० ॥

ཁ་ཙང་འདས་པ་མ་འོང་པ། ཉི་མ་ཐུན་དང་ནི་གནངས་ནང་པར།
ཕྱི་ཐུན་དེ་ཐུན་དེ་དུས་ཙམ་ན། ཐབས་གཅིག་དང་ནི་ལྷན་གཅིག་ལ།
དུས་ཀུན་དུ་དང་རྟག་དུ་དང་ ॥ 40

एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा ।
दिग्देशकाले पूर्व्वादौ प्रागुदक्प्रत्यगादयः ॥ ४१ ॥

ད་ལྟ་དང་ནི་དེ་ལྟར་དང་། ད་དང་ད་ལྟ་དེ་བཞིན་དུ།
ཕྱོགས་དང་ཡུལ་དང་དུས་ཡིན་ནོ། ཤར་ལ་སོགས་པ་སྔོན་མ་དང་།
ཕྱི་མ་དང་ནི་གཞན་ལ་སོགས॥ 41

इत्यव्यय वर्गः ।

མི་ཟད་པའི་སྡེ་ཚན་ནོ ॥

लिङ्गादिसंग्रहवगः ।

सलिङ्गशास्त्रैः सन्नादिकृत्तद्धितसमासजैः ।
अनुक्तैः संग्रहो लिङ्गं संकीर्णवदिहोन्नयेत् ॥ १ ॥

རྟགས་བསྡུས་པའི་སྡེ་ཚན།

རྟགས་དང་ལྡན་པའི་བསྟན་བཅོས་ཀྱིས། སན་ལ་སོགས་པ་ཀྲིད་དྡྷི་ད།
བསྡུ་བ་ལས་སྐྱེས་མ་བཤད་པ། བསྡུས་རྟགས་འདྲེས་བཞིན་འདི་ཤེས་བྱ॥ 1

लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधितः ।
स्त्रियामीदूद्विरामैकाच् सयोनि प्राणिनाम च ॥ २ ॥

རྟགས་ཀྱི་ལྷག་མ་ཁྱབ་པའི་ཕྱིར། བྱེ་བྲག་འགའ་ཞིག་མ་གནོད་པ།
ཨུ་ནའི་རྐྱེན་ཅན་རྣམས་ནི་མོ། མོ་ནི་ཨཱི་དང་ཨཱུ་དང་ནི།
ངལ་གསོ་དབྱངས་གཅིག་ལས་མེད་དང་།
སྐྱེ་གནས་ལྡན་པའི་སེམས་ཅན་རྣམས॥ 2

नामविद्युन्निशावल्ली वीणादिग्भूनदीह्रियाम् ।
अदन्तै र्द्विगुरेकार्थो न स पात्रयुगादिभिः ॥ ३ ॥

མིང་དང་གློག་དང་མཚན་མོ་དག། འཁྲི་ཤིང་མདའ་དང་ཕྱོགས་དང་ས།
གཙང་པོ་ཁྲོ་གྲོ་ས་རྣམས་ནི་མོ། ཨ་མཐའ་བ་གཉིས་དོན་གཅིག་དང་།
སྣོད་དང་དུས་སོགས་མ་གཏོགས་པ॥ 3

तल्हन्दे येनिकञ्चा वैरमैथुनकादिवुन् ।
स्त्रीभावादावनिक्तिन् वुल् णच् कयपोऽयुजञिङ्निशाः ॥ ४ ॥

ཏ་ལ་ཚོགས་ག་ཀ་ཊ་ཊ། འདྲེས་འཁྲིམས་ལ་སོགས་ཊུ་ནའོ*།
མོ་དང་ཟླ་བ་ལ་སོགས་པ། ཨ་ནི་ཀཱི་ཊུ་ལ་དང་།
ཙ་ན་ཀྲུ་བ་ཨ་ཡུ་ཛ། ཨ་ང་ཤི་ཉ་ནི་ཊཱ་རྣམས།། 4

उणादिषुनिरूरीश्च ङ्याबूङन्तं चरं स्थिरम् ।
तत् क्रीड़ायां प्रहरणं चेन्मौष्टा पाल्लवा ण दिक् ॥ ५ ॥

ཨུཎ་ལ་སོགས་པ་ནི་ཊྲུ་རཱི། ཨ་དི་ཨཱ་ན་ཨུག་གཡོ་བརྟན།
དེ་ལ་རྩེད་མོ་འི་རྩེག་ཆ་དང་། ཁ་ཚུར་ཐལ་ལྕུག་ཊ་ནི་མོ་འི་ཀྱེན།། 5

घञोञः सा क्रियास्याञ्चेद्दाण्डपाता हि फाल्गुनी ।
श्यैनम्पाता हि मृगया तैलम्पाता स्वधेति दिक् ॥ ६ ॥

གྷཉོ་ཉ་ནི་དེའི་བྱ་བ། ཆད་པ་ལྷུང་བ་སྤོ་ཏྲ་དང་།
ཁྲ་དང་ལྷུང་བ་རི་དགས་དང་། མར་ཁུ་འཁྲུངས་པ་བདུད་རྩི་མོ།། 6

स्त्री स्यात् काचिन्मृणाल्यादि विवक्षापचये यदि ।
लङ्का शेफालिका टीका धातकी पञ्जिकाढ़की ॥ ७ ॥

མོ་ཡིན་ཙུང་ཟད་པད་རྩ་སོགས། བརྗོད་འདོད་འཚང་བའི་ཀྱེན།
གལ་ཏེ་ན། ལང་ཀཱ་ཤེ་པཱ་ལི་ཀཱ་དང་།
ཊཱི་ཀ་དང་ནི་དྷཱ་ཏ་ཀཱི། དཀའ་འགྲེལ་དང་ནི་བྲེ་བོ་འོ།། 7

* For ཐུ་ནོར ?

सिध्रका सारिका हिक्का प्राचिकोल्का पिपीलिका ।
तिन्दुकी कणिका भङ्गिः सुरुङ्गा सूचि माढ़यः ॥ ८ ॥

སི་དྷྲའི་ཤིང་དང་སྨྲ་བྲེད་བྲེའུ། ཨི་ག་བྲུ་སྦྲང་རྩི་འབར་བ་དང་།
ཏྲོག་མ་དེལ་དུ་ཀའི་ཤིང་། ཞིབ་མོ་བཅོམ་དང་ཆོས་ལེགས་དང་།
ཕྲ་མ་སཱུ་ཙྪི་ལོ་མ་དང་ ॥ 8

पिच्छा वितण्डाकाकिण्यश्चूर्णिः शानी द्रुणी दरत् ।
सातिः कन्था तथा सन्दी नाभी राजसभापि च ॥ ९ ॥

འབྲས་བུ་ཀོལ་བ་ཕུབ་དང་ནི། ཕྱིམ་ཤཱ་ཎཱི་གོས།
ཤིན་དུ་དགའ་དང་ཐེམ་དུག་དང་། དེ་བཞིན་སྟན་ལྟེ་རྒྱལ་པོའི་འཁོར ॥ 9

झल्लरी चर्च्चरी पारी होरा लट्वा च सिध्मला ।
लाक्षा लिक्षा च गण्डूषा गृध्रसी चमसी मसी ॥ १० ॥

ཛྷལླ་རཱི་ཙ་ཙ་རཱི། འཁར་བ་རི་མོ་དུས་སྦྱོར་དང་།
ཉ་རྒྱལ་ཚོས་དང་སྲོ་མ་ཁྲུས། ཚང་སྣོད་སྣག་ཚ་གྲི་དྷྲ་སཱི།
མོའི་རྟགས་ཀྱི་དབྱེ་བའོ ॥ 10

पुंस्त्वे सभेदानुचराः सपर्य्यायाः सुरासुराः ।
स्वर्गयागाद्रि मेघाब्धि द्रुकालासिशरारयः ॥ ११ ॥

སྐྱེས་བུ་དེ་དབྱེ་རྗེས་སུ་སྤྱོད། རྣམ་གྲངས་དང་བཅས་ལྷ་ལྷ་མིན།
མཐོ་རིས་གཏོད་སྦྱིན་རི་དང་སྤྲིན། རྒྱ་མཚོ་ཤིང་དང་དུས་དང་ནི།
རལ་གྲི་མདའ་དང་དགྲ་དང་ནི ॥ 11

करगण्डौष्ठदोर्दन्तकण्ठकेशनखस्तनाः ।
अह्नाहान्ताः क्ष्वेड़भेदा रात्रान्ताः प्रागसंख्यकाः ॥ १२ ॥

ལག་པ་འགྲམ་མཆུ་དཔུང་བས་སོ། མགྲིན་སྐྲ་སེན་མོ་ནུ་མ་དང་།
ཉིན་མོ་ཧ་ཡི་མཐར་ཅན་ནོ། དུག་གི་དབྱེ་བ།
མཚན་མོ་མཐའ་དང་དང་པོ་གྲངས॥ 12

श्रीवेष्टाद्याश्च निर्यासा असन्नन्ता अबाधिताः ।
कशेरु जतुवस्तूनि हित्वा तुरुविरामकाः ॥ १३ ॥

དཔལ་འདོད་ལ་སོགས་ཚོན་རྩི་དང་། དམིགས་བྱེ་མ་ཡིན་མོན་ལུག་དང་།
དངོས་པོ་མ་གཏོགས་པ་ཡི་ནི། ཏུ་དང་རུ་ཡ་ངལ་གསོ་དང་॥ 13

क ष ण भ मरोपान्ता यद्यदन्ता अमी अथ ।
प थ न य स टोपान्ता गोत्राख्याश्चरणाह्वयाः ॥ १४ ॥

འདི་རྣམས་ཉེ་བའི་མཐའ་ཅན། ཨའི་མཐའ་ཅན་ནི་འདིར་མོ་འོ།
ཀ་ཥ་ཎ་བྷ་རའི་རྗེན། པ་ཡི་མཐའ་ཅན་གང་ལ་ནི།
ཨ། ཐ། པ། ཐ། ན། ཡ། ས། ཊ་དང་པ་ཡི་མཐའ་ཅན་པོ།
རིགས་པ་དགྲགས་པ་ཞབས་དང་འབོད॥ 14

नाम्नयकर्त्तरि भावे च घ ञ ज ब् नञ् णघाद्युचः ।
ल्युः कर्त्तरीमनिज्भावे को घोः किःप्रादितोऽन्यतः ॥ १५ ॥

མིང་དང་བྱེད་པ་ངོ་བོ་ལ། གྷ་ཉ་ཛ་ཡ་ནི་ལ་གྷ།
ཨ་ཕྲུ་ཙ་དང་ལྱུ་དང་བྱེད། ཨ་ནི་ཙ་ནི་ངོ་བོ་ཉིད།
ཀ་གྷ་ཀི་ནི་དང་པོ་གཞན॥ 15

द्वन्द्वेऽश्ववडवावश्ववडवा न समाहृते ।
कान्तः सूर्य्येन्दुपर्य्यायाः पूर्व्वोऽयः पूर्व्वकोऽपि च ॥ १६ ॥

ཟླ་དང་རྡོ་དང་ནོར་བུ་དང་། རྡོ་དང་ནོར་བུ་ཡི་སྒྲ་རྣམས། ཀ་ཡི་མཐའ་ཅན་ཉི་ཟླ་དང་། ཨ་ཡ་སྔོན་དུ་བཞག་པའོ། སྔོན་ཉིད་ཀྱང་ངོ་།།16

वटकश्चानुवाकश्च रल्लकश्च कुटुङ्गकः ।
पुङ्खो न्यूङ्खः समुद्गश्च विटपट्टघटाः खटः ॥ १७ ॥

མི་ཐུང་རྗེས་བརྗོད་བ་ལང་དང་། ཁྲིམ་དང་མདའ་སྒོང་རིག་བྱེད་དང་། ཐུན་པོ་སྡུག་ཅན་དང་སྦྲ་རྩི། མཁར་དང་ཁྲིན་པ་སྐྱན་དངགས་མཁན།། 17

कोट्टारघट्टहट्टाश्च पिण्डगोण्डपिचिण्डवत् ।
गडुः करण्डोलगुडावरण्डश्च किणो घुणः ॥ १८ ॥

ཚངས་པ་རིགས་ངན་མངལ་སྟག་སྦྲ། ལོ་མ་བལྷགས་པ་ཞིང་སྲིན་བུ། ཟམ་ཏོག་དང་དབུག་པ་དང་།། 18

इति सीमन्त हरितो रोमन्थोद्गीथबुद्बुदाः ।
कासमर्द्दोऽर्द्दनिः कुन्दः फेनस्तूपौ सपूपकौ ॥ १९ ॥

ཆུ་སྐྱུལ་སྣ་མཚམས་ལྗང་ཁུ་དང་། སྐྱུག་ལྡན་སྐེགས་པ་ཆུ་བུར་དང་། འགྲི་ཤིང་འགྲོ་སྐྱོང་བཟང་དང་ནི། སྦུ་བ་མཆོད་རྟེན་གདིང་ཚིག་དང་།། 19

आतपः क्षत्रिये नाभिः कुणपक्षुरकेदराः ।
पूरक्षुरप्रचुक्राश्च गोलहिङ्गुलपुद्गलाः ॥ २० ॥

ཉི་འོད་རྒྱལ་རིགས་ལྟེ་བ་དང་། མདའ་དང་སྤུ་གྲི་གས་པ་དང་།
ཆུ་འཕེལ་རྨིག་པ་སྐྱུར་མོ་དང་། གྲི་ཕྲུག་ཚོ་ལ་དང་གང་ཟག་དང་། ॥ 20

वेतालमल्लभल्लाश्च पुरोडाशोऽपि पट्टिशः ।
कुल्माषो रभसश्चैव सकटाहः पतद्ग्रहः ॥ २१ ॥

རོ་ལངས་གྲུད་དང་སྟ་རེ་དང་། མཆོད་སྦྱིན་པ་པ་ཊྚི་ཤ་དང་།
ཅབ་མ་དགའ་བ་དེ་བཞིན་དུ། ཤིང་རྟ་བ་ཤད་པ་སོ་སོར་འདོད།
པའི་རྟགས་ཀྱི་དབྱེ་བའོ། ॥ 21

द्विहीनेऽन्यच्च खारण्यपर्णश्वभ्रहिमोदकम् ।
शीतोष्णमांसरुधिरमुखाक्षिद्रविणं बलम् ॥ २२ ॥

གཉིས་དམན་གཞན་ནོ་མཁས་དང་། ནི། དགོན་པ་འདབ་མ་དོང་དང་ནི།
ཁ་བ་ཆུ་དང་གྲང་དྲོ་དང་། ཤ་ཁྲག་ཁ་མིག་ཁུ་བ་དང་། ॥ 22

हलहेमशुल्वलोहसुखदुःखशुभाशुभम् ।
जलपुष्पाणि लवणं व्यञ्जनान्यनुलेपनम् ॥ २३ ॥

སྟབས་དང་གོམ་དང་གསེར་ཟངས་ལྕགས། བདེ་སྡུག་དགེ་དང་མི་དགེ་དང་།
ཆུ་དང་མེ་ཏོག་རྣམས་དང་ནི། ཚ་དང་ཚུང་ཡབ་རྗེས་བྱུག་པ། ॥ 23

कोव्याः शतादिसंख्यान्या वा लक्षा नियुतञ्च तत् ।
द्वचक मसिसुसन्नन्तं यदनान्तमकर्त्तरि ॥ २४ ॥

བྲེ་བ་བརྒྱ་ལ་སོགས་པའི་གྲངས། གཞན་ཡང་འབུམ་དང་ས་ཡ་དང་།
ཀ་གཉིས་མ་སི་སུ་སནྟི་དི། གང་ལ་ཨ་ནི་ཅན་དང་ ॥ 24

चान्तं सलोपधं शिष्टं राचं प्राक् संख्ययान्वितम् ।
पाचाद्यदन्तैरेकार्थो द्विगु र्लक्ष्यानुसारतः ॥ २५ ॥

བྲེད་པོ་མ་གེགས་ཏྲ་མཐའ་དང་། ས་ལ་ཏེ་སྔོན་ཤི་ཀྲ་དང་།
མཚན་མོ་གྲངས་དང་ལྡན་པ་དང་། སྔོད་ལ་སོགས་པ་ཨ་མཐའ་ཅན།
དོན་གཅིག་གོང་དུ་གྲངས་ལྡན་པ། ཁ་གཉིས་མཚན་ཉིད་རྗེས་འབྲང་བ ॥ 25

द्वन्द्वैकत्वाव्ययीभावौ पथः संख्याव्ययात् परः ।
षष्ठ्याश्छाया बहूनाञ्चेद्विच्छायं संहतौ सभा ॥ २६ ॥

ཟླས་དབྱེ་གཅིག་ཉིད་མི་ཟད་དངོས། ལམ་གྲངས་མི་ཟད་པ་རོལ་ལོ། མ་ནིང་ངོ་།
དྲུག་ཚུ་གྲིབ་མ་མང་གཉིས་གྲིབ། · ཚོགས་པ་དང་ནི་འདུས་པ་དང་ ॥ 26

शालार्थापि परा राजाऽमनुष्यार्थादराजकात् ।
दासीसभं नृपसभं रक्षःसभमिमा दिशः ॥ २७ ॥

ཤཱ་ལཱ་དོན་གྱི་པ་རོལ་དུ། རྒྱལ་པོ་མི་དོན་རཱ་ཛ་སྤངས།
གཡོག་མོ་འདུས་དང་མི་དབང་འདུ། སྲུང་བ་འདུས་འདིར་ཕྱོགས་མིན* ॥ 27

---

* For ཡིན ?

उपज्ञोपक्रमान्तश्च तदादित्वप्रकाशने ।
कोपज्ञकोपक्रमादि कन्योशीनरनामसु ॥ २८ ॥

ཉེར་ཞེས་ཉེ་བར་བགྲོད་པའི་མཐའ། དེ་ལ་གཉིས་ཉིད་རབ་ཏུ་གསལ།
ཚངས་ཞེས་ཚངས་པའི་གོ་རིམ་སོགས། དུག་པོ་ཤཱི་ན་རཱ་ནཱ་མ་སུ།། 28

भावे न णकचिड्ड्योऽन्ये समूहे भावकर्म्मणोः ।
अदन्तप्रत्ययाः पुण्यसुदिनाभ्यां त्वहःपरः ॥ २९ ॥

ཎྐྀ་བ་ན་དང་ཚ་དང་ཀ། ཙ་ད་རྣམས་དང་གཞན་ལའོ།
ཚོགས་པ་ངོ་བོ་ཉིད་དང་ལས། ཨ་ཡི་མཐའ་ཅན་རྐྱེན་རྣམས་སོ།
བསོད་ནམས་ཉི་བཟང་ཉི་མའི་པ་རོལ།། 29

क्रियाव्ययानां भेदकान्येकत्वेऽप्युक्थतोटके ।
चोचं पिच्छं गृहस्थूणं तिरीटं मर्म्मयोजनम् ॥ ३० ॥

བྱ་བ་མི་ཟད་རྣམས་ཀྱིས་ནི། དབྱེ་བ་གཞན་དང་གཅིག་ཉིད་དོ།
རིག་བྱེད་དང་ནི་གར་བྱེ་བྲག། ཏ་ལའི་འབྲས་བུ་རྨ་བྱའི་མདོངས།
ཁྱིམ་དང་སྣ་བ་ཐོད་དང་ནི། སོག་གི་གནས་དང་དཔག་ཚད་དོ།། 30

राजसूयं वाजपेयं गद्यपद्ये कृतौ कवेः ।
माणिक्यभाष्यसिन्दूरचीरचीवरपञ्जरम् ॥ ३१ ॥

རྒྱལ་པོ་མཆོད་སྦྱིན་བ་ཛཱ་པེ་ཡཾ། ཚིགས་བཅད་ཀང་ལྷན་མཁས་པས་བྱས།
ནོར་བུ་ཁང་དང་སིནྡཱུ་ར། གོས་སྙིང་གོས་དང་གུར་དང་ནི།། 31

लोकायतं हरितालं विदलं स्थालवाल्लवम् ।
पुंनपुंसकयोः शेषोऽर्द्धर्चपिण्याककण्टकाः ॥ ३२ ॥

འཇིག་རྟེན་འགྲོ་དང་བབ་བླ་དང་། བདུག་རྫས་སྤོར་མ་གུར་གུ་མོ།
སྐྱེ་བུ་མ་ནིང་ལྷག་མ་ནི། ཕྱེད་མཆེད་འབའ་ཚ་ཚོར་མ་དང་༎ 32

मोदक स्तण्डक ष्टङ्कः शाटकः कर्व्वटोऽर्बुदः ।
पातकोद्योगचरकतमालामलका नड़ः ॥ ३३ ॥

ཟས་དབྱེ་རྒྱུན་ཆགས་མཐུན་བྲལ་དང་། གོས་དང་བརྒྱ་གྲོང་ཤར་དང་ནི།
ལྷུང་བ་ཉེར་སྤྱོད་སྨན་དཔྱད་དང་། ཏ་མཱ་ལཱ་དང་གྲོང་མཐའ་དང་༎ 33

कुष्ठं मुण्डं शीधु बुस्तं क्ष्वेड़ितं क्षेमकुट्टिमम् ।
सङ्गमं शतमानार्म्मं सम्बलाव्ययताण्डवम् ॥ ३४ ॥

ལྷམ་ར་རུས་རྟ་མགོ་དང་ཚང་། ཕུ་རི་སེང་སྦྲ་བདེ་དང་བུམ།
གྲོགས་པ་བརྒྱ་ཚང་མིག་ནད་དང་། རྒྱུགས་དང་མི་ཟད་གར་དང་ནི༎ 34

कवियं कन्दकार्पासं पारावारं युगन्धरम् ।
यूपं प्रग्रीवपात्रीवे यूष श्चमसचिक्कसौ ॥ ३५ ॥

ཁའི་སྐྱེ་ལས་དང་རས་བལ་དང་། པ་རོལ་ཚུ་རོལ་གཉའ་ཤིང་འཛིན།
ཁྲུད་རྣམས་སྦྲ་གྲི་བ་དང་ནི། ལྷུང་བཟེད་གཙུ་བླ་ཚང་སྣོད༎ 35

अर्द्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ।
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ॥ ३६ ॥

ཕྱེད་མཆོད་ལ་སོགས་མར་སོགས་རྣམས། སྐྱེ་བུ་ལ་སོགས་རིག་བྱེད་ངེས།
དེ་འདིར་མ་བཤད་འཇིག་རྟེན་ལ། དེ་ཡོད་ན་ཡང་ལྷག་མི་བཞིན།། 36

स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः ।
जातिभेदाः पुमाख्याश्च स्त्रीयोगैः सहमल्लकः ॥ ३७ ॥

ཕོ་མོ་བུ་རྒྱུད་མཐའ་ཅན་དང་། གཉིས་བཞི་དྲུག་ཚིག་ལྟོས་འགྲོ་རྣམས།
རིགས་དབྱེ་དང་སྐྱེ་བུར་གྲགས། བུད་མེད་སྦྱོར་བས་ལྷན་ཅིག་བྱེད།། 37

मुनि र्वराटकः स्वाति र्वर्णको जाटलिर्म्मनुः ।
मूषा स्तृपाटी कर्कन्धु यँष्टिः शाटी कटौ कुटिः ॥ ३८ ॥

ཐུབ་པ་མཛེས་དང་ས་རིང་དང་། ཁ་དོག་ཛ་ཊ་ལི་དང་མཐུན།
གསེར་སྐྱོང་བ་ཡི་བྱེ་བྲག་དང་། ཁྲག་འཛིན་མཆོད་སྡོང་དང་།
གོས་དང་ཀེད་པོ་དུ་ལུའི་*།། 38

स्त्रीनपुंसकयो र्भावक्रिययोः ष्यञ् क्वचिच्च वुञ् ।
औचित्य मौचिती मैत्री मैत्र्यं वुञ् प्रागुदाहृतः ॥ ३९ ॥

མོ་དང་མ་ནིང་ཥྱཉ་བ་དང་། བྱ་བ་ཝུཉ་འགའ་ཞིག་བུཉ།
རིགས་དང་མི་རིགས་བྱམས་མི་བྱམས། བུཉ་དང་པོར་དཔེར་བརྗོད་པ།། 39

* For ཕུ་ལུར ?

षष्ठ्यन्तप्राक्पदाः सेनाछायाशालासुरानिशाः ।
स्याद्वा नृसेनं श्वनिशङ्गोशाल मितरे च दिक् ॥ ४० ॥

དྲུག་པའི་མཐའ་དང་དང་པོ་འི་ཚིག། དམག་དང་གྲིབ་ས་ར་བ་དང་།
ཆང་དང་མཚན་མོ་ཡིན་པའམ། མི་དམག་སང་དགོངས་བ་ལང་ར། །
གཞན་ཡང་ཕྱོགས་ཡིན་མོ་མིན་ནོ ॥ 40

आवन्नन्तोत्तरपदो द्विगुश्चापुंसि नस्य लुप् ।
चिखट्वञ्च चिखट्वी च चितक्षञ्च चितक्ष्यपि ॥ ४१ ॥

ཨ་ཡི་མཐའ་ཅན་ཡིན་པ། ཕྱི་ཚིག་པ་གཉིས་སྐྱེས་བུའོ།
ན་ཡང་ཕྱིས་ཤིང་ཁྲོགས་ཁྲི་གསུམ།
ཁྲི་གསུམ་གསུམ་འཇོག་གསུམ་འཇོག་ཀྱང་ ॥ 41

चिषु पात्री पुटी वाटी पेटी कुवलदाड़िमौ ।
परं लिङ्गं स्वप्रधाने द्वन्द्वे तत्पुरुषेऽपि तत् ॥ ४२ ॥

གསུམ་པོ་སྣོད་དང་ཐུབ་པོ་ཁྲར། སྒྲོམ་དང་ཨུཏྤལ་སེ་འབྲུའོ།
གཞན་གྱི་རྟགས་ཅན་རང་ཉིད་གཙོ། ཟླས་དབྱེ་དེ་ཡི་སྐྱེས་བུ་དེ ॥ 42

अर्थान्ताः प्राद्यलं प्राप्तापन्नपूर्व्वाः परोपगाः ।
तद्धितार्थौ द्विगुः संख्यासर्व्वनामतदन्तकाः ॥ ४३ ॥

དོན་གྱི་མཐའ་ཅན་སྔོན་སྦྱར་རྒྱུན། ཐོབ་པ་རྙེད་པ་སྔ་ཕྱིར་འགྲོ།
དེ་དེ་དོན་པ་གཉིས་པ། གྲངས་དང་མིང་ནི་ཐམས་ཅད་པ ॥ 43

बहुव्रीहिरदिङ् नाम्ना मुन्नेया तदुदाहृतिः ।
गुणद्रव्यक्रियायोगोपाधयः परगामिनः ॥ ४४ ॥

མཐའ་ཅན་འབྲུ་མང་པོ། ཕྱོགས་མིན་མིང་ནི་དཔེར་བརྗོད་ཞེས།
ཡོན་དན་རྫས་དང་བྱ་སྦྱོར་བ། སྦྱོན་མ་ཉེ་བ་པ་རོལ་འགྲོ།། 44

कृतः कर्त्तर्य्यसंज्ञायां कृत्याः कर्त्तरि कर्म्मणि ।
अणाद्यन्ता स्तेन रक्ताद्यर्थे नानार्थभेदकाः ॥ ४५ ॥

ཀྲི་ད་བྱེད་བྱ་མིང་མེད་དང་། ཀྲི་ཏུ་བྱེད་པོ་ལས་ལའོ།
ཨ་ཎ་ལ་སོགས་མཐའ་ཅན་ནི། དེ་ཡིས་དམར་པོ་ལ་སོགས་དོན།
སྣ་ཚོགས་དོན་གྱི་དབྱེ་བ་རྣམས།། 45

षट् संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययम् ।
परं विरोधे शेषन्तु ज्ञेयं शिष्टप्रयोगतः ॥ ४६ ॥

དྲུག་གི་མིང་ཅན་མཚུངས་པ་གསུམ། བདག་དང་གཞན་གཉིང་མི་ཟད་རྣམས།
འགལ་བ་རྣམས་ནི་ཕྱི་མ་ལ། མཁས་པ་རྣམས་ཀྱིས་རབ་སྦྱར་ལས།
ལྷག་མ་རྣམས་ནི་ཤེས་པར་བྱ།། 46

इत्यमरसिंहकृतौ नामलिङ्गानुशासने ।
सामान्यस्तृतीयः काण्डः साङ्ग एव समर्थितः ॥ ४७ ॥

इति लिङ्गादिसंग्रहवर्गः ।

རྟགས་བསྡུས་པའི་སྡེ་ཚན་ནོ།

པདྨ་རྣམས་ནི་ཉི་མ་རྒྱས།
སྙན་དངགས་རྣམས་ནི་མཁས་པ་ཡིས།
དེ་ཡི་དྲི་བཟང་རླུང་གིས་འདེད།
དེ་བཞིན་མཁས་པས་དེ་ཡོན་དན།
འཆི་བ་མེད་པའི་སེང་གེ་ཞེས་བྱ་བས་མཛད་པའི།
མིང་དང་རྟགས་ཀྱི་རྗེས་སུ་བཤད་པ་རྫོགས་སོ།

པཎྜི་ཏ་ཆེན་པོ་ཀཱིརྟི་ཙནྡྲའི་ཞལ་སྔ་ནས།
ཡར་ལྕུངས་པ་གྲགས་པ་རྒྱལ་མཚན་གྱིས།
བལ་ཡུལ་ཡཾ་བུའི་གྲོང་ཁྱེར་དུ་བསྒྱུར་བའོ།།